सौगतसिद्धान्तसारसंग्रहः

डॉ० चन्द्रधर शर्मा

शान्तरक्षित ग्रन्थालय

के०उ०ति०शि०संस्थान

सारनाथ, वाराणसी

1989

॥ श्रीः ॥

हरिदास-संस्कृत-ग्रन्थमाला

२४८



॥ श्रीः ॥

सौगतसिद्धान्तसारसंग्रहः

स्वोपज्ञहिन्दीभाषानुवादसहितः

संगृहीता

डाक्टर चन्द्रधर शर्मा

एम० ए०, डी० फिल्०, डी० लिट्०, एल् एल्० बी०,

साहित्याचार्य, साहित्यरत्न, आदि

प्राध्यापक, दर्शन विभाग, काशी हिन्दू विश्वविद्यालय ।



चौखम्बा-संस्कृत-सीरिज, बनारस-१

सं० २०११] [ई० १९५४

प्रकाशकः—
जयकृष्णदास हरिदास गुप्तः,
चौखम्बा-संस्कृत-सीरिज आफिस,
पो० बाक्स नं० ८, बनारस

प्रथम संस्करण
१९५४

मुद्रकः—
विद्याविलास प्रेस,
बनारस-१

विषय-सूची

प्रथम परिच्छेद : पालिवाङ्मय

द्वितीय परिच्छेद : महायानवैपुल्यसूत्र

तृतीयपरिच्छेद : शून्यवाद

चतुर्थपरिच्छेद : विज्ञानवाद

पञ्चमपरिच्छेद : स्वतन्त्रविज्ञानवाद

॥ श्रीः ॥

सौगत-सिद्धान्त-सार-संग्रहः

प्रथमः परिच्छेदः

पालिवाङ्मयम्

विनयपिटकं

महावग्गो

नमो तस्स भगवतो अरहतो सम्मा सम्बुद्धस्स.

१, १, १. तेन समयेन बुद्धो भगवा उरुवेलायं विहरति नज्जा नेरञ्जराय तीरे बोधिरुक्खमूले पठमा'भिसम्बुद्धो। अथ खो भगवा पटिच्चसमुप्पादं अनुलोमपटिलोमं मनसा'कासि। अविज्जापच्चया संखारा, संखारपच्चया विञ्ञाणं, विञ्ञाणपच्चया नामरूपं, नामरूप-पच्चया सळायतनं, सळायतनपच्चया फस्सो, फस्सपच्चया वेदना, वेदना-पच्चया तण्हा, तण्हापच्चया उपादानं, उपादानपच्चया भवो, भवपच्चया जाति, जातिपच्चया जरामरणं सोकपरिदेवदुक्खदोमनस्सु'पायासा संभवन्ति। एवमे'तस्स केवलस्स दुक्खक्खन्धस्स समुदयो होति।

१, १, २. अविज्जाय त्वे'व असेसविरागनिरोधा संखारनिरोधो, संखारनिरोधा विञ्ञाणनिरोधो, विञ्ञाणनिरोधा नामरूपनिरोधो, नामरूपनिरोधा सळायतननिरोधो, सळायतननिरोधा फस्सनिरोधो, फस्स-निरोधा वेदनानिरोधो, वेदनानिरोधा तण्हानिरोधो, तण्हानिरोधा उपादाननिरोधो, उपादाननिरोधा भवनिरोधो, भवनिरोधा जातिनि-रोधो, जातिनिरोधा जरामरणं सोकपरिदेवदुक्खदोमनस्सु'पायासा निरुज्झन्ति। एवमे' तस्स केवलस्स दुक्खक्खन्धस्स निरोधो होति।

१, १, ५. अधिगतो खो मया' यं धम्मो गंभीरो दुद्दसो दुरनुबोधो सन्तो पणीतो अतक्कावचरो निपुणो पण्डितवेदनीयो । आलयारामा खो पना'यं पजा आलयरता आलयसम्मुदिता । आलयारामाय खो पन पजाय आलयरताय आलयसम्मुदिताय दुद्दसं इदं ठानं यदिदं इदप्पच्चयता पटिच्चसमुप्पादो । इदम्पि खो ठानं सुदुद्दसं यदिदं सब्बसंखारसमथो सब्बूपधिपटिनिस्सग्गो तण्हाक्खयो विरागो निरोधो निब्बाणं ।

अपारुता तेसं अमतस्स द्वारा ये सोतवन्तो पमुञ्चन्तु सद्धम् ।

१, १, ७. अथ खो भगवा बाराणसियं इसिपतने मिगदाये पञ्चवग्गिये भिक्खू एतद'वोच—अरहं भिक्खवे, तथागतो सम्मासम्बुद्धो, ओदहथ भिक्खवे सोतं, अमतं अधिगतं, अहं अनुसासामि, अहं धम्मं देसेमि । द्वे' मे भिक्खवे अन्ता पब्बजितेन न सेवितब्बा । कतमे द्वे ? यो चायं कामेसु कामसुखल्लिकानुयोगो हीनो गम्मो पोथुज्जनिको अनरियो अनत्थसंहितो, यो चायं अत्तकिलमथानुयोगो दुक्खो अनरियो अनत्थसंहितो । एते खो भिक्खवे उभो अन्ते अनुपगम्य मज्झिमा पटिपदा तथागतेन अभिसम्बुद्धा ।

इदं खो पन भिक्खवे दुक्खं अरियसच्चं । जाति पि दुक्खा, जरा पि दुक्खा, ब्याधि पि दुक्खा, मरणं पि दुक्खं, अप्पियेहि सम्पयोगो दुक्खो, पियेहि विप्पयोगो दुक्खो, यं पि इच्छं न लभति तं पि दुक्खं, संखित्तेन पञ्चु' पादानक्खन्धा पि दुक्खा ।

इदं खो पन भिक्खवे दुक्खसमुदयं अरियसच्चं । या' यं तण्हा पोनोभविका नन्दिरागसहगता तत्र तत्राभिनन्दिनी, सेय्यथी' दं, कामतण्हा, भवतण्हा, विभवतण्हा ।

इदं खो पन भिक्खवे दुक्खनिरोधं अरियसच्चं । यो तस्सा येव तण्हाय असेसविरागनिरोधो चागो पटिनिस्सग्गो मुत्ति अनालयो ।

इदं खो पन भिक्खवे दुक्खनिरोधगामिनी पटिपदा अरियसच्चं । अयमेव अरियो अट्ठङ्गिको मग्गो, सेय्यथी' दं, सम्मा दिट्ठि, सम्मासंकप्पो, सम्मा वाचा, सम्मा कम्मन्तो, सम्मा आजीवो, सम्मा वायामो, सम्मा सति, सम्मा समाधि । अयं खो सा भिक्खवे मज्झिमा पटिपदा तथागतेन अभिसम्बुद्धा ।

यतो च खो मे भिक्खवे इमेसु चतूसु अरियसच्चेसु एवं तिपरिवट्टं द्वादसाकारं यथाभूतं ञाणदस्सनं सुविसुद्धं अहोसि, अथाहं भिक्खवे सदेवके लोके समारके सब्रह्मके सस्समणब्राह्मणिया पजाय सदेव-मनुस्साय अनुत्तरं सम्मा सम्बोधिं अभिसम्बुद्धो'ति पच्चञ्ञासिं ।

१, १, ८. एवं भगवता बाराणसियं इसिपतने मिगदाये अनुत्तरं धम्मचक्कं पवत्तित्तं अप्पटिवत्तियं समणेन वा ब्राह्मणेन वा देवेन वा मारेन वा ब्रह्मुना वा केनचि वा लोकस्मिं ।

१, २, ५. चरथ भिक्खवे चारिकं बहुजनहिताय बहुजनसुखाय लोकानुकम्पाय अत्थाय हिताय सुखाय देवमनुस्सानं । देसेथ भिक्खवे धम्मं आदिकल्याणं मज्झेकल्याणं परियोसानकल्याणं सात्थं सब्यंजनं केवलपरिपुण्णं परिसुद्धं ब्रह्मचरियं पकासेथ ।

१, ४, २. ये धम्मा हेतुप्पभवा तेसं हेतुं तथागतो आह ।
तेसं च यो निरोधो एवंवादी महासमणो ॥

इमं सुत्वा विरजं वीतमलं धम्मचक्खुं उदपादि—यं किंचि समुदय-धम्मं सब्बं तं निरोधधम्मं ति ।

सुत्तपिटकं

दीघनिकायो

१. सन्ति भिक्खवे एके समणब्राह्मणा सस्सतवादा, सस्सतं अत्तानं च लोकं च पञ्ञापेन्ति । सन्ति भिक्खवे एके समणब्राह्मणा उच्छेदवादा, सत्तो सत्तस्स उच्छेदं विनासं विभवं पञ्ञापेन्ति । सन्ति भिक्खवे एके समणब्राह्मणा, एकच्चसस्सतिका एकच्चअसस्सतिका, एकच्चं सस्सतं एकच्चं असस्सतं अत्तानं च लोकं च पञ्ञापेन्ति ।

इमे खो ते भिक्खवे समणब्राह्मणा पुब्बन्तकप्पिका च अपरन्त-कप्पिका च पुब्बन्ता'परन्तकप्पिका च पुबन्ता'परन्ता'नुदिट्ठिनो पुब्बन्ता' परन्तं आरब्भ अनेकविहितानि अधिवुत्तिपदानि अभिवदन्ति, द्वासट्ठिया वत्थूहि । नत्थि इतो बहिद्धा ।

तदिदं भिक्खवे तथागतो पजानाति, ततो च उत्तरितरं पजानाति, तं च पजाननं न परामसति, अपरामसतो च' स्स पच्चत्तं येव निब्बुति विदिता, वेदनानं समुदयं च अत्थगमं च अस्सादं च आदीनवं च निस्सरणं च यथाभूतं विदित्वा अनुपादा विमुत्तो भिक्खवे तथागतो।

इमे खो ते भिक्खवे धम्मा गंभीरा दुद्दसा दुरनुबोधा सन्ता पणीता अतक्कावचरा निपुणा पण्डितवेदनीया ये तथागतो सयं अभिञ्ञा सच्छिकत्वा पवेदेति, ये हि तथागतस्स यथाभुच्चं वण्णं सम्मा वदमाना वदेय्युं।

(ब्रह्मजालसुत्तं)

२. इत्थं खो मे भन्ते पूरणो कस्सपो सामञ्ञफलं पुट्ठो समानो अकिरियं व्याकासि। खुरपरियत्तेन चे पि चक्केन यो इमिस्सा पठविया पाणे एकमंसखलं एकमंसपुंजं करेय्य, नत्थि ततो निदानं पापं। दानेन दमेन संयमेन सच्चवज्जेन नत्थि पुञ्ञं' ति।

इत्थं खो मे भन्ते मक्खलिगोसालो सामञ्ञफलं पुट्ठो समानो संसारसुद्धिं व्याकासि। नत्थि हेतु नत्थि पच्चयो सत्तानं संकिलेसाय। नत्थि हेतु नत्थि पच्चयो सत्तानं विसुद्धिया'ति।

इत्थं खो मे भन्ते अजितो केसकम्बली सामञ्ञफलं पुट्ठो समानो उच्छेदवादं व्याकासि। नत्थि दिन्नं, नत्थि हुतं, नत्थि सुकटदुकटानं कम्मानं फलं विपाको, नत्थि अयं लोको, नत्थि परो लोको। चातुम्महाभूतिको अयं पुरिसो यदा कालं करोति पठवी पठवीकायं, आपो आपोकायं, तेजो तेजोकायं, वायो वायोकायं अनुपेति, आकासं इन्द्रियाणि संकमन्ति।

इत्थं खो मे भन्ते पकुधो कच्चायनो सामञ्ञफलं पुट्ठो समानो अञ्ञेन अञ्ञं व्याकासि। पठवीकायो आपोकायो तेजोकायो वायोकायो सुखे दुक्खे जीवसत्तमे इमे सत्तकाया अकटा अकटविधा अनिम्मिता कूटट्ठा। ते न इञ्जन्ति न विपरिणमन्ति न अञ्ञमञ्ञं व्याबाधेन्ति। नत्थि हन्ता वा घातेता वा सोता वा सावेता वा विञ्ञाता वा विञ्ञापेता वा।

इत्थं खो मे भन्ते निगण्ठो नातपुत्तो सामञ्ञफलं पुट्ठो समानो चातु-

यामसंवरं व्याकासि। निगण्ठो सब्बवारीवारितो सब्बवारीयुतो सब्बवारीधुतो सब्बवारीपुट्ठो होति एवं चातुयामसंवरसंवुतो होति।

इत्थं खो मे भन्ते सञ्जयो बेलट्ठिपुत्तो सामञ्ञफलं पुट्ठो समानो विक्खेपं व्याकासि। तथा ति पि मे नो। अञ्ञथा ति पि मे नो। नो ति पि मे नो। नो नो ति पि मे नो। अत्थि पि मे नो। नत्थि पि मे नो। उभयं पि मे नो। नोभयं पि मे नो।

सोहं भन्ते भगवन्तं पि पुच्छामि सामञ्ञफलं।

महाराज इदं सामञ्ञफलं यदयं भिक्खु सब्बदिट्ठी अतिक्कन्तो सीलसम्पन्नो होति समाधिसम्पन्नो होति पञ्ञासम्पन्नो होति। सवितक्कं सविचारं विवेकजं पीतिसुखं पठमज्झानं उपसम्पज्ज विहरति। अवितक्कं अविचारं समाधिजं पीतिसुखं दुतियज्झानं उपसम्पज्ज विहरति। पीतिया च विरागा च उपेक्खको च सतिमा सुखविहारी ततियज्झानं उपसम्पज्ज विहरति। पुन न भिक्खु सुखस्स च पहाना दुक्खस्स च पहाना पुब्बेन सोमनस्सदोमनस्सानं अत्थंगमा अदुक्खं असुखं उपेक्खासतिपरिसुद्धिं चतुत्थज्झानं उपसम्पज्ज विहरति। सो इदं दुक्खं ति, अयं दुक्खसमुदयो ति, अयं दुक्खनिरोधो ति, अयं दुक्खनिरोधगामिनी पटिपदा ति यथाभूतं पजानाति। तस्स एवं पजानतो कामासवा भवासवा अविज्जासवा पि चित्तं विमुच्चति। खीणा जाति, वुसितं ब्रह्मचरियं, कतं करणीयं, ना परं इत्थत्ताया ति पजानाति। (सामञ्ञफलसुत्तं)

६. अब्याकतं खो पोट्ठपाद मया—सस्सतो लोको, असस्सतो लोको, सस्सतासस्सतो लोको, नेव सस्सतो नेवासस्सतो लोको; अन्तवा लोको, अनन्तवा लोको, अन्तानन्तवा लोको, नेव अन्तवा नेवानन्तवा लोको; होति तथागतो परं मरणा, न होति तथागतो परं मरणा, होति च न च होति तथागतो परं मरणा, नेव होति न न होति तथागतो परं मरणा; तं जीवं तं सरीरं, अञ्ञं जीवं अञ्ञं सरीरं, इदमेव सच्चं मोघं अञ्ञं ति, एतं पि सब्बं खो पोट्ठपाद मया अब्याकतं। न हेतं पोट्ठपाद अत्थसंहितं न धम्मसंहितं न आदिब्रह्मचरियकं, न निब्बिदाय, न विरागाय, न निरोधाय, न उपसमाय, न अभिञ्ञाय, न सम्बोधाय, न

निब्बाणाय संवत्तति। तस्मा तं मया अब्याकतं ति। इदं दुक्खं ति, अयं दुक्खसमुदयो ति, अयं दुक्खनिरोधो ति, अयं दुक्खनिरोधगामिनी पटिपदा ति खो पोट्ठपाद मया व्याकतं ति। एतं हि खो पोट्ठपाद अत्थसंहितं, एतं धम्मसंहितं, एतं आदिब्रह्मचरियकं, एतं निब्बिदाय, विरागाय, निरोधाय, उपसमाय, अभिञ्ञाय, सम्बोधाय, निब्बाणाय संवत्तति, तस्मा तं मया व्याकतं ति।

यथा पि पुरिसो एवं वदेय्य—अहं या इमस्मिं जनपदे जनपदकल्याणी तं इच्छामि तं कामेमी ति। तमेनं एवं वदेय्युं अम्भो पुरिस यं त्वं जनपदकल्याणीं इच्छेसि कामेसि, जानासि तं जनपदकल्याणीं खत्ती वा ब्राह्मणी वा वेस्सी वा सुद्दी वा ति? जानासि तं एवं नामा एवं गोत्ता ति वा दीघा वा रस्सा वा मज्झिमा ति वा काली वा सामा वा मंगुरच्छवी वा ति, अमुकस्मिं गामे वा निगमे वा नगरे वा ति? इति पुट्ठो 'नो' ति वदेय्य। तं किं मञ्ञसि पोट्ठपाद ननु एवं सन्ते तस्स पुरिसस्स अप्पाटीहीरकं भासितं सम्पज्जती ति? एवमेव खो पोट्ठपाद ये ते समणब्राह्मणा एवंवादिनो एवंदिट्ठिनो एकन्तसुखी अत्ता होति अरोगो परं मरणा ति, त्या हं उपसंकमित्वा एवं वदामि सच्चं किर तुम्हे आयस्मन्तो एवं वादिनो एवं दिट्ठिनो एकन्तसुखी अत्ता होति अरोगो परं मरणा ति? ते च मे एवं पुट्ठा 'आमो' ति पटिजानन्ति। त्या हं एवं वदामि—अपि पन तुम्हे आयस्मन्तो एकन्तसुखं लोकं जानं पस्सं विहरथा ति? इति पुट्ठा 'नो' ति वदन्ति। त्या हं एवं वदामि—अपि पन तुम्हे आयस्मन्तो एकं वा रत्तिं एकं वा दिवसं एकन्तसुखिं अत्तानं सञ्जानाथा ति? इति पुट्ठा 'नो' ति वदन्ति। तं किं मञ्ञसि पोट्ठपाद न नु एवं सन्ते तेसं समणब्राह्मणानं अप्पाटिहीरकतं भासितं संपज्जतीति?

यो खो भिक्खवे पटिच्चसमुप्पादं पस्सति सो धम्मं पस्सति, यो धम्मं पस्सति सो पटिच्चसमुप्पादं पस्सति। सेय्यथा पि भिक्खवे गवा खीरं, खीरम्हा दधि, दधिम्हा नवनीतं, नवनीतम्हा सप्पि, सप्पिम्हा सप्पिमण्डो। यस्मिं समये खीरं होति नेव तस्मि समये दधि इति संखं गच्छति न नवतीतं न सप्पि न सप्पिमण्डो ति, खीरं त्वेव संखं गच्छति। यस्मिं

समये दधि होति दधित्वेव तस्मिं समये संखं गच्छति। एवमेव खो भिक्खवे यो मे अहोसि अतीतअत्तपटिलाभो सो च अत्तपटिलाभो तस्मिं समये सच्चो अहोसि, मोघो अनागतो मोघो पच्चुप्पन्नो। यो मे भविस्सति अनागतो अत्तपटिलाभो सो च मे अत्तपटिलाभो तस्मिं समये सच्चो भविस्सति, मोघो अतीतो मोघो पच्चुप्पन्नो। यो मे एतरहि पच्चुप्पन्नो अत्तपटिलाभो सो च मे अत्तपटिलाभो सच्चो, मोघो अतीतो मोघो अनागतो।

इमा खो भिक्खवे लोकसमञ्ञा लोकनिरुत्तिया लोकवोहारा लोकपञ्ञत्तियो, या हि तथागतो वोहरति अपरामसन्ति। (पोट्ठपादसुत्तं)

१५. एत्तावता खो आनन्द अत्तानं पञ्ञापेन्तो पञ्ञापेति—रूपं मे अत्ता इति, वेदना मे अत्ता इति, सञ्ञा मे अत्ता इति, संखारा मे अत्ता इति, विञ्ञाणं मे अत्ता इति। सब्बे पि धम्मा आनन्द अनिच्चा संखता पटिच्चसमुप्पन्ना खयधम्मा वयधम्मा विरागधम्मा निरोधधम्मा। इति सो दिट्ठे व धम्मे अनिच्चं सुखदुक्खवोकिण्णं उप्पादवयधम्मं अत्तानं समनुपस्समानो समनुपस्सति। यदा हि सब्बेन सब्बं सब्बथा सब्बं अपरिसेसा निरुज्झेय्युं अपि नु खो तत्थ 'अयं अहं अस्मीति सिया ति ?

(महानिदानसुत्तं)

१६. यावकीवं च भिक्खवे भिक्खू अभिण्हं सन्निपाता सन्निपातबहुला भविस्सन्ति, यावकीवं च समग्गा सन्निपतिस्सन्ति समग्गा वुट्ठहिस्सन्ति समग्गा संघकरणीयानि करिस्सन्ति, यावकीवं च अप्पञ्ञत्तं न पञ्ञापेस्सन्ति पञ्ञत्तं न समुच्छिन्दिस्सन्ति यथापञ्ञत्तेसु सिक्खापदेसु समादाय वत्तिस्सन्ति, यावकीवं च ये ते भिक्खू थेरा संघपितरो संघपरिणायका ते सक्करिस्सन्ति गरुकरिस्सन्ति मानेस्सन्ति पूजेस्सन्ति तेसं च सोतब्बं मञ्ञिस्सन्ति, यावकीवं च उप्पन्नाय तण्हाय पोनोभविकाय न वसं गच्छन्ति, यावकीवं च आरञ्ञकेसु सेनासनेसु सापेक्खा भविस्सन्ति, यावकीवं च पच्चत्तं येव सतिं उपट्ठापेस्सन्ति, किंति अनागता च पेसला सब्रह्मचारी आगच्छेय्युं, आगता च पेसला सब्रह्मचारी फासुं विहरेय्युं, वुद्धि येव भिक्खवे भिक्खूनं पाटिकङ्खा नो परिहानि इति।

यावकीवं च भिक्खवे इमे सत्त अपरिहानिया धम्मा भिक्खूसु ठस्सन्ति, वुद्धि येव भिक्खवे भिक्खूनं पाटिकङ्खा नो परिहानि।

अथ भगवा भिक्खू आमन्तेसि—सिया खो पन भिक्खवे एकभिक्खुस्सपि कंखा वा विमति वा बुद्धे वा धम्मे वा संघे वा मग्गे वा पटिपदाय वा ? पुच्छथ भिक्खवे। मा पच्छा विप्पटिसारिनो अहुवत्थ। एवं वुत्ते ते भिक्खू तुण्ही अहेसुं। नत्थि एकभिक्खुस्सपि कंखा वा विमति वा। अथ खो भगवा भिक्खू आमन्तेसि—अत्तदीपा विहरथ अत्तसरणा अनञ्ञसरणा धम्मदीपा धम्मसरणा अनञ्ञसरणा। हन्द दानि भिक्खवे आमन्तयामि वो 'वयधम्मा संखारा अप्पमादेन सम्पादेथा' इति। अयं तथागतस्स पच्छिमा वाचा। (महापरिनिब्बाणसुत्तं)

मज्झिमनिकायो

२८. कतमो च भिक्खवे रूपुपादानक्खन्धो ? चत्तारि च महाभूतानि- पठवीधातु आपोधातु तेजोधातु वायोधातु, चतुन्नं च महाभूतानं उपादाय रूपं।

यतो च खो भिक्खवे अज्झत्तिकं चेव चक्खुं अपरिभिन्नं होति, बाहिरा च रूपा आपाथं आगच्छन्ति तज्जो च समन्नाहारो होति, एवं तज्जस्स विञ्ञाणभागस्स पातुभावो होति। तस्मा पटिच्च समुप्पन्नं विञ्ञाणं अञ्ञत्रपज्जया नत्थि विञ्ञाणस्स संभवोति वदामि।

चक्खुं च पटिच्च रूपे च उप्पज्जति विञ्ञाणं चक्खुविञ्ञाणं। सोतं च पटिच्च सद्दे च उप्पज्जति विञ्ञाणं सोतविञ्ञाण। घाणं च पटिच्च गन्धे च उप्पज्जति विञ्ञाणं घाणविञ्ञाणं। कायं च पटिच्च फोट्ठब्बे च उप्पज्जति विञ्ञाणं कायविञ्ञाणं। जिह्वां च पटिच्च रसे च उप्पज्जति विञ्ञाणं जिह्वाविञ्ञाणं। मनं च पटिच्च धम्मे च उप्पज्जति विञ्ञाणं मनोविञ्ञाणं त्वेव संखं गच्छति।

यं तथाभूतस्स रूपं तं रूपुपादानक्खन्धे, या तथाभूतस्स वेदना सा वेदनूपादानक्खन्धे, या तथाभूतस्स सञ्ञा सा सञ्ञुपादानक्खन्धे,

ये तथाभूतस्स संखारा ते ते संखारुपादानक्खन्धे, यं तथाभूतस्स विञ्ञाणं तं विञ्ञाणुपादानक्खन्धे च सङ्गहं गच्छति।

तस्मादिह भिक्खवे यं किंचि रूपं, या काचि वेदना, या काचि सञ्ञा, ये केचि संखारा, यं किंचि विञ्ञाणं अतीतानागतपच्चुप्पन्नं अज्झत्तं वा बहिद्धा वा, सब्बं 'नेतं मम, नेसो' हमस्मि, न मे सो अत्ता' ति एवमेतं यथाभूतं सम्पञ्ञाय दट्ठब्बं।

६३. यो खो भिक्खवे एवं वदेय्य 'न तावाहं भगवति ब्रह्मचरियं चरिस्सामि, याव मे भगवा न व्याकरिस्सति सस्सतो लोको ति वा, असस्सतो लोको ति वा, अन्तवा लोको ति वा, अनन्तवा लोको ति वा, तं जीवं तं सरीरं ति वा, अञ्ञं जीवं अञ्ञं सरीरं ति वा, होति तथागतो परं मरणा ति वा, न होति तथागतो परं मरणा ति वा, अव्याकतमेव तं भिक्खवे तथागतेन अस्स, अथ सो पुग्गलो कालं करेय्य। यथापि भिक्खवे पुरिसो सल्लेन विद्धो अस्स सविसेन गाल्हापलेपनेन, तस्स मित्ता भिसक्कं उपट्ठापेय्युं। सो एवं वदेय्य 'न तावाहं इमं सल्लं आहारिस्सामि याव न तं पुरिसं जानामि येनम्हि विद्धो—खत्तियो वा ब्राह्मणो वा वेस्सो वा सुद्दो वा, एवं नामो एवं गोत्तो वा, दीघो वा रस्सो वा मज्झिमो वा' ति अनञ्ञातं एव तं भिक्खवे तेन पुरिसेन अस्स, अथ सो पुरिसो कालं करेय्य।

६४. इध भिक्खवे अस्सुतवा पुथुज्जनो अरियानं अदस्सावी अरियधम्मस्स अकोविदा सक्कायदिट्ठी परियुट्ठितेन चेतसा विहरति। ये धम्मा न मनसिकरणीया ते धम्मे मनसि करोति। ये धम्मा मनसिकरणीया ते धम्मे न मनसि करोति।

२. तस्स एवं अयोनिसो मनसिकरोतो छन्नं दिट्ठीनं अञ्ञतरा दिट्ठि उप्पज्जति—अत्थि मे अत्ता ति वा, नत्थि मे अत्ता ति वा, अत्तना अत्तानं संजानामि ति वा, अनत्तना अत्तानं संजानामि ति वा सच्चतो थेततो दिट्ठि उप्पज्जति। अथवा पनस्स एवं दिट्ठि होति—यो मे अयं अत्ता वदो वदेय्यो तत्र तत्र कल्याणपापकानं कम्मानं विपाकं पटिसंवेदेति, सो खो पन मे अयं अत्ता निच्चो धुवो सस्सतो अविपरिणाम-

धम्मो सस्सतिसमं तथेव ठस्सतीति। अयं भिक्खवे केवलो परिपूरो बालधम्मो। इदं वुच्चति भिक्खवे दिट्ठिगतं दिट्ठिगहनं दिट्ठिकन्तारं दिट्ठिविसूकं दिट्ठिविप्फन्दितं दिट्ठिसंयोजनं। दिट्ठिसंयोजनसंयुत्तो भिक्खवे न परिमुच्चति जरामरणेन सोकेहि परिदेवेहि दुक्खेहि दोमनस्सेहि उपायासेहि, न परिमुच्चति दुक्खस्माति वदामि।

२. सुतवा च भिक्खवे अरिया सवको अरियानं दस्सावी अरियधम्मस्स कोविदो दुक्खं दुक्खसमुदयं दुक्खनिरोधगामिनीं पटिपदां योनिसो मनसिकरोति तस्स तीणि संयोजनानि पहीयन्ति—सक्कायदिट्ठि, विचिकिच्छा, सीलब्बतपरामासो। स भवति सोतापन्नो अविनिपातधम्मो नियतो संबोधिपरायणो।

७२. दिट्ठिगतं ति भो भिक्खवे अपनीतमेतं तथागतस्स। तस्मा तथागतो सब्ब मञ्ञितानं सब्बमथितानं सब्बअहंकारममकारमानानुसयानं खया विरागा निरोधा चागा पटिनिस्सग्गा अनुपादा विमुत्तोति।

२६. ओदहथ भिक्खवे सोतं, अमतमधिगतं, अहं अनुसासामि अहं धम्मं देसेमि।

संयुत्तनिकायो

२१,२ सब्बे संखारा अनिच्चा, सब्बे संखारा दुक्खा, सब्बे धम्मा अनत्ता, यदनिच्चं तं दुक्खं, यं दुक्खं तदनत्ता, यदनत्ता तं नेतं मम, ने सोहमस्मि, न मे सो अत्ताति।

१४,१ अनमतग्गोयं भिक्खवे संसारो। पुब्बा कोटि न पञ्ञायति। अपरा कोटि'पि न पञ्ञायति।

१४,२ तं किं मञ्ञथ भिक्खवे कतमं नु खो बहुतरं यं वा वो इमिना दीघेन अद्धुना संधावतं संसरतं कंदंतानं रोदन्तानं अस्सुपस्सन्दं पग्घरितं, एतदेव बहुतरं यं वा चतुसु महासमुद्देसु उदकं ति ?

१४,२ तं कि मञ्ञथ भिक्खवे कतमं नु खो बहुतरं यं वा वो इमिना दीघेन अद्धुना संधावतं संसरतं सीसच्छिन्नानं लोहितं पस्सन्दं पग्घरितं, एतदेव बहुतरं यं वा चतुसु महासमुद्देसु उदकं ति ?

१६,१० रूपं भिक्खवे निच्चं धुवं सस्सतं अविपरिणामधम्मं नत्थि इति सम्मतं लोके पंडितानं। अहं पि तं नत्थीति वदामि। वेदना सञ्ञा संखारा विञ्ञानं निच्चं धुवं सस्सतं अविपरिणामधम्मं नत्थि इति सम्मतं लोके पंडितानं। अहं पि तं नत्थीति वदामि।

नाहं भिक्खवे लोकेन विवदामि। लोको च मया विवदति। न भिक्खवे धम्मवादी केन चि लोकस्मिं विवदति। यं भिक्खवे अत्थि संमतं पंडितानं अहम्पि तं अत्थीति वदामि। यं भिक्खवे नत्थि संमतं पंडितानं अहं पि तं नत्थीति वदामि।

अंगुत्तरनिकायो

३,३२ एतं सन्तं एतं पणीतं यदिदं सब्बसंखारसमथो सब्बूपधिपटिनिस्सग्गो तण्हक्खयो विरागो निरोधो निब्बाणं।

२,३३ इमिना मं परियायेन सम्मावदमानो वदेय्य 'उच्छेदवादी समणो गोतमो'ति, अहं हि भिक्खवे उच्छेदं वदामि रागस्स दोसस्स मोहस्स अनेकविहितानं पापकानं अकुसलानं धम्मानं उच्छेदं वदामि इति। ७,६ यं करणीयं कतं वो तं मया। एतानि भिक्खवे रुक्खमूलानि, एतानि सुञ्ञागारानि। झायथ भिक्खवे मा पमादत्थ। अयं अम्हाकं अनुसासनीति।

खुद्दकनिकायो

(१)

खुद्दकपाठो

६. खीणं पुराणं नवं नत्थि संभवं विरत्तचित्ता आयतिके भवस्मिं।
ते खीणबीजा अविरूल्हिछन्दा निब्बन्ति धीरा यथा' यम्पदीपो॥
६. सुखिनो वा खेमिनो होन्तु सब्बे सत्ता भवन्तु सुखितत्ता।

(२)

धम्मपदं

मनो पुब्बङ्गमा धम्मा मनोसेट्ठा मनोमया।
मनसा चे पदुट्ठेन भासति वा करोति वा।
ततो 'नं दुक्खमन्वेति चक्कं' व वहतो पदं ॥ १ ॥
न अन्तलिक्खे न समुद्दमज्झे न पब्बतानं विवरं पविस्स।
न विज्जती सो जगति प्पदेसो यत्थ ट्ठितं न प्पसहेय्य मच्चू ॥ १२८ ॥
दीघा जागरतो रत्ति दीघं सन्तस्स योजनं।
दीघो बालानं संसारो सद्धम्मं अविजानतं ॥ ६० ॥
सेलो यथा एकघनो वातेन न समीरति।
एवं निन्दापसंसासु न समिञ्जन्ति पण्डिता ॥ ८१ ॥
को नु हासो किमानन्दो निच्चं पज्जलिते सति।
अन्धकारेन ओनद्धा पदीपं न गवेस्सथ ॥ १४६ ॥
गहकारक! दिट्ठोसि पुन गेहं न काहसि।
सब्बा ते फासुका भग्गा गहकूटं विसंखितं।
विसंखार गतं चित्तं तण्हानं खयमज्झगा ॥ १५४ ॥
अत्ता हि अत्तनो नाथो को हि नाथो परो सिया ॥ १६० ॥
सब्ब पापस्स अकरणं कुसलस्स उपसम्पदा।
स चित्तपरियोदपनं एतं बुद्धान सासनं ॥ १८३ ॥
दुक्खं दुक्खसमुप्पादं दुक्खस्स च अतिक्कमं।
अरियं च अट्ठंगिकं मग्गं दुक्खूपसमगामिनं ॥ १६१ ॥
एतं खो सरणं खेमं एतं सरणमुत्तमं ॥ १६२ ॥
एतं ञत्वा यथाभूतं निब्बानं परमं सुखं ॥ २०३ ॥
पविवेकरसं पीत्वा रसं उपसमस्स च।
निद्दरो होति निप्पापो धम्मपीतिरसं पिवं ॥ २०५ ॥
कामतो जायते सोको कामतो जायते भयं।
कामतो विप्पमुत्तस्स नत्थि सोको कुतो भयं ॥ २१५ ॥
ततो मला मलतरं अविज्जा परमं मलं।

एतं मलं पहत्वान निम्मला होथ भिक्खवो ॥ २४३ ॥
नत्थि रागसमो अग्गि नत्थि दोससमो गहो ।
नत्थि मोहसमं जालं नत्थि तण्हा समा नदी ॥ २५१ ॥
आकासे च पदं नत्थि समणो नत्थि बाहिरे ।
संखारा सस्सता नत्थि नत्थि बुद्धानमिञ्जितं ॥ २५५ ॥
पपञ्चाभिरता पजा निप्पपञ्चा तथागता ॥ २५४ ॥
कुसो यथा दुग्गहीतो हत्थमेवा नु कन्तति ।
सामञ्ञं दुप्परामट्ठं निरयायुपकड्ढति ॥ ३११ ॥
अभये भयदस्सिनो भये चाभयदस्सिनो ।
मिच्छादिट्ठिसमादाना सत्ता गच्छन्ति दुग्गतिं ॥ ३१७ ॥
यस्स पारं अपारं वा पारावारं न विज्जति ॥ ३८५ ॥
वाहितपापो ति ब्राह्मणो समचरिया समणो ति वुच्चति ।
पब्बाजयमत्तनो मलं तस्मा पब्बजितो ति वुच्चति ॥ ३८८ ॥

(३)

उदानं

१०. यत्थ आपो न पठवी तेजो वायो न गाधति ।
न तत्थ सुक्का जोतन्ति आदिच्चो न प्पकासति ॥
न तत्थ चन्दिमा भाति तमो तत्थ न विज्जति ।
यदा च अत्तना वेदि मुनि सो तेन ब्राह्मणो ।
अथ रूपा अरूपा च सुखदुक्खा पमुच्चति ॥

१२. यं च कामसुखं लोके यं चिदं दिवियं सुखं ।
तण्हक्खयसुखस्से ते कलं नग्घन्ति सोळसिं ॥

२६. यम्हि न माया वत्तति न मानो यो खीणलोभो अममो निरासो ।
पणुन्नकोधो अभिनिब्बुतत्तो सो ब्राह्मणो सो समणो स भिक्खू ॥

३०. सब्बतो तण्हानं खया असेसविरागनिरोधो निब्बानं ।
तस्स निब्बुतस्स भिक्खुनो अनुपादा पुनब्भवो न होति ॥

७१. तदाहं भिक्खवे नेव आगतिं वदामि न गतिं न ठितिं न चुतिं न उपपत्तिं। अप्पतिट्ठं अपावत्तं अनारंभणमेव तं एसे' वन्तो दुक्खस्साति।

७३. यस्मा च खो भिक्खवे अत्थि अजातं अभूतं अकतं असंखतं तस्मा जातस्स भूतस्स कतस्स संखतस्स निस्सरणं पञ्ञायति।

(४)

इतिवुत्तकं

११२. सब्बे सब्बाभिभू धीरो सब्बगन्थप्पमोचनो।
फुट्ठस्स परमा सन्ति निब्बानं अकुतोभयं॥
एस सो भगवा बुद्धो एस सीहो अनुत्तरो।
सदेवकस्स लोकस्स ब्रह्मचक्कं पवत्तयि॥

(५)

सुत्तनिपातो

१, १३. यो नाच्चसारी न पच्चसारी सब्बं वितथमिदं ति वीतमोहो।
सो भिक्खु जहाति ओरपारं उरगो जिण्णमिव तचं पुराणं॥
३, १६. आदीनवं कामगुणेसु दिस्वा एको चरे खग्गविसाणकप्पो॥
न जच्चा वुसलो होति न जच्चा होति ब्राह्मणो।
७, २७. कम्मुना वुसलो होति कम्मुना होति ब्राह्मणो॥
११, १२. छन्दरागविरत्तो सो भिक्खु पञ्ञाणवा इध।
अज्झगा अमतं सन्ति निब्बानपदमच्चुतं॥
३२, ३८. पुण्डरीकं यथा वग्गु तोये न उपलिप्पति।
एवं पुञ्ञे च पापे च उभये त्वं न लिप्पसि॥
३५, ४३. यो थ पुञ्ञं च पापं च उभो संगं उपच्चगा।
असोकं विरजं सुद्धं तमहं ब्रूमि ब्राह्मणं॥
५०, ६. तक्कं च दिट्ठीसु पकप्पयित्वा सच्चं मुसा ति द्वयधम्ममाहु।
६५, ३. निब्बानं इति तं ब्रूमि जरामच्चुपरिक्खयं।

अभिधम्मपिटकं

कथावत्थु

थेरवादी—पुग्गलो उपलब्भति सच्चिकट्ठ परमट्ठेना ति ?

पुग्गलवादी—आमन्ता ।

थेर—यो सच्चिकट्ठ परमट्ठो ततो सो पुग्गलो उपलब्भति सच्चिकट्ठ परमट्ठेना ति ?

पुग्गल—न हे वं वत्तब्बे ।

थेर—आजानाहि निग्गहं—

(१) हञ्चि पुग्गलो उपलब्भति सच्चिकट्ठ परमट्ठेन, तेन वत रे वत्तब्बे यो सच्चिकट्ठ परमट्ठो ततो सो पुग्गलो उपलब्भति सच्चिकट्ठ परमट्ठेना ति ।

(२) यं तत्थ वदेसि 'वत्तब्बे खो पुग्गलो उपलब्भति सच्चिकट्ठ परमट्ठेन' इति, 'नो च वत्तब्बे यो सच्चिकट्ठ परमट्ठो ततो सो पुग्गलो उपलब्भति सच्चिकट्ठ परमट्ठेन' इति मिच्छा ।

(३) न च वत्तब्बे 'यो सच्चिकट्ठ परमट्ठो ततो सो पुग्गलो उपलब्भति सच्चिकट्ठ परमट्ठेन' इति, नो च वत रे वत्तब्बे 'पुग्गलो उपलब्भति सच्चिकट्ठ परमट्ठेन' इति ।

(४) यं तत्थ वदेसि 'वत्तब्बे खो पुग्गलो उपलब्भति सच्चिकट्ठ परमट्ठेन' इति ।

(५) नो च वत्तब्बे 'यो सच्चिकट्ठ परमट्ठो ततो सो पुग्गलो उपलब्भति सच्चिकट्ठ परमट्ठेन' इति मिच्छा ।

पटिकम्मचतुक्कं

पुग्गल—पुग्गलो नूपलब्भति सच्चिकट्ठ परमट्ठेना ति ?

थेर—आमन्ता ।

पुग्गल—यो सच्चिकट्ठ परमट्ठो ततो सो पुग्गलो नूपलब्भति सच्चिकट्ठ परमट्ठेनाति ?

थेर—न हे वं वत्तब्बे ।

पुग्गल—आजानाहि पटिक्कमं—

(१) हञ्चि पुग्गलो नूपलब्भति सच्चिकट्ठ परमट्ठेन, तेन वत रे वत्तब्बे यो सच्चिकट्ठ परमट्ठो ततो सो पुग्गलो नूपलब्भति सच्चिकट्ठ परमट्ठेन।

(२) यं तत्थ वदेसि 'वत्तब्बे खो पुग्गलो नूपलब्भति सच्चिकट्ठ परमट्ठेन' इति, 'नो च वत्तब्बे यो सच्चिकट्ठ परमट्ठो ततो सो पुग्गलो नूपलब्भति सच्चिकट्ठ परमट्ठेन' इति मिच्छा ।

(३) नो चे पन वत्तब्बे 'यो सच्चिकट्ठ परमट्ठो ततो सो पुग्गलो नूपलब्भति सच्चिकट्ठ परमट्ठेन' इति, नो चे वत रे वत्तब्बे 'पुग्गलो नूपलब्भति सच्चिकट्ठ परमट्ठेन' इति ।

(४) यं तत्थ वदेसि 'वत्तब्बे खो पुग्गलो नूपलब्भति सच्चिकट्ठ परमट्ठेन, नो च वत्तब्बे यो सच्चिकट्ठ परमट्ठो ततो सो पुग्गलो नूपलब्भति सच्चिकट्ठ परमट्ठेन' इति मिच्छा ।

उपादापञ्ञत्तानुयोगो

थेर—पुग्गलो संधावति अस्मा लोका परं लोकं परस्मा लोका इमं लोकं ति¿

पुग्गल—आमन्ता ।

थेर—सो पुग्गलो संधावति ?

पुग्गल—न हे वं वत्तब्बे ।

थेर—अञ्ञो पुग्गलो संधावति ?

पुग्गल—न हे वं वत्तब्बे ।

थेर—सो च अञ्ञो च पुग्गलो संधावति ?

पुग्गल—न हे वं वत्तब्बे ।

थेर—नेव सो न अञ्ञो पुग्गलो संधावति ?

पुग्गल—न हे वं वत्तब्बे ।

थेर—आजानाहि निग्गहं।

पुग्गल—न वत्तब्बं पुग्गलो संधावति अस्मा लोका परं लोकं परस्मा लोका इमं लोकं ति ?

थेर—आमन्ता।

पुग्गल—ननु वुत्तं भगवता—

'स सत्तक्खत्तु परमं संधावित्वान पुग्गलो।
दुक्खस्सन्तकरो होति सब्बसंयोजनक्खया॥' इति ?

(इतिवुत्तकं, २४)

थेर—आमन्ता।

पुग्गल—तेन हि पुग्गलो संधावतीति।

थेर—स चेहि संधावति स्वेव पुग्गलो इतो चुतो परं लोकं अनञ्ञो हि एवं मरणं न हेहिति। पाणातिपातो नूपलब्भति। कम्मं अत्थि ? कम्मविपाको अत्थि ? कतानं कम्मानं विपाको अत्थि ?

पुग्गल—आमन्ता।

थेर—कुसलाकुसले विपच्चमाने स्वेव सन्धावतीति मिच्छा।

थेर—स्वेव पुग्गलो सन्धावति ?

पुग्गल—आमन्ता।

थेर—सवेदनो ससञ्ञो ससंखारो सविञ्ञाणो सन्धावति ?

पुग्गल—आमन्ता।

थेर—तं जीवं तं सरीरं ति ?

पुग्गल—न हेवं वत्तब्बे।

थेर—आजानाहि निग्गहं—

खन्धेसु भिज्जमानेसु सो चे भिज्जति पुग्गलो।
उच्छेदा भवति दिट्ठि या बुद्धेन विवज्जिता॥
खन्धेसु भिज्जमानेसु नो चे भिज्जति पुग्गलो।
पुग्गलो सस्सतो होति निब्बानेन समसमो॥

बुद्धघोषः

अट्ठकथा

तत्थ सम्मुतिसच्चं परमत्थसच्चं ति द्वे सच्चानि। ये पन एवमकत्वा सच्चं ति वचनसामान्येन सम्मुतिञाणमपि सच्चारम्भणमेवाति वदन्ति (न ते परमत्थं जानन्ति।)

एवं समुप्पन्नमिदं सहेतुकं दुक्खं अनिच्चं चलमित्तर' द्धुवं।
धम्मेहि धम्मा पभवन्ति हेतुसो न हेत्थ अत्ताव परो च विज्जति॥
धम्मा धम्मे संजनयन्ति हेतुसम्भारपच्चया।
हेतूनं च निरोधाय धम्मो बुद्धेन देसितो॥
हेतूसु उपरुद्धेसु छिन्नं वट्टं न वट्टति।
एवं दुक्खन्तकिरियाय ब्रह्मचरियीध विज्जति।
सत्ते च नूपलम्भन्ते नेवुच्छेदो न सस्सतं॥

मिलिन्दपञ्हो

१,१४०. योनकानं राजा मिलिन्दो एतदवोचत्—तुच्छो वत भो जम्बुदीपो। पलापो वत भो जम्बुदीपो। नत्थि कोचि समणो वा ब्राह्मणो वा यो मया सद्धिं सल्लपितुं सक्कोति कंखं पटिविनोदेतुं इति।

१,४४, अत्थि महाराज नागसेनो नाम थेरो पण्डितो मेधावी। उस्सहति सो तया सद्धिं सल्लपितुं कंखं पटिविनोदेतुं इति।

२,१–२. अथ खो मिलिन्दो राजा आयस्मन्तं नागसेनं एतदवोच—किंनामोसि भन्ते ति। नागसेनो ति खो मं महाराज सब्रह्मचारी समुदाचरन्ति। न हेत्थ पुग्गलो उपलब्भती ति।

स चे भन्ते नागसेन को सीलं रक्खति? को भावनामनुयुञ्जति? को मग्गफलनिब्बानानि सच्छिकरोति? तस्मा नत्थि कुसलं नत्थि अकुसलं। तुम्हाकं पि भन्ते नत्थि आचरियो नत्थि उपज्झायो नत्थि उपसम्पदा। कतमो एत्थ नागसेनो? किं नु खो भन्ते केसा नागसेनो? नहि महाराज। लोमा नागसेनो? नहि महाराज। नखा दन्ता तचो मंसं नहारु अट्ठि मिञ्जा लोहितं मेदो वसा नागसेनो? नहि महाराज। किं नु खो भन्ते रूपं वा वेदना वा सञ्ञा वा संखारा वा विञ्ञाणं वा

नागसेनो ? नहि महाराज। किं पन भन्ते रूपवेदनासञ्ञासंखारविञ्ञाणं नागसेनो ? नहि महाराज। किं पन भन्ते अञ्ञत्र रूपवेदनासञ्ञासंखार-विञ्ञाणं नागसेनो ? नहि महाराज तमहं भन्ते पुच्छन्तो पुच्छन्तो न पस्सामि नागसेनं।

२, ३ अथ खो आयस्मा नागसेनो मिलिन्दं राजानं एतदवोच-किं नु खो त्वं पादेनागतोसि उदाहु वाहनेन ? रथेनाहं भन्ते आगतोस्मि। स चे त्वं महाराज रथं मे आरोचेहि। किं नु खो महाराज ईसा रथो ? नहि भन्ते। अक्खो रथो ? नहि भन्ते। चक्कानि रथो ? नहि भन्ते। रथपञ्जरं रथो ? नहि भन्ते। युगं रथो ? नहि भन्ते। रस्मियो रथो ? नहि भन्ते। किं नु खो महाराज ईसाअक्खचक्करथपंजरयुगरस्मिपतोदं रथो ? नहि भन्ते। किं पन महाराज अञ्ञत्र रथो ? नहि भन्ते। तमहं महाराज पुच्छन्तो पुच्छन्तो न पस्सामि रथं। अलिकं त्वं महाराज भाससि मुसावादं नत्थि रथो।

नाहं भन्ते नागसेन मुसा भणामि। ईसं च पटिच्च, अक्खं च पटिच्च, चक्कानि रथपञ्जरं च पटिच्च रथो' ति संखा समञ्ञा पञ्ञत्ति वोहारो नाममत्तं पवत्ततीति।

साधु खो त्वं महाराज रथं जानासि। एवमेव खो महाराज मय्हम्पि केसे च पटिच्च, लोमे च पटिच्च, रूपं वेदनं सञ्ञं संखारे विञ्ञाणं च पटिच्च नागसेनो' ति संखा समञ्ञा पञ्ञत्ति वोहारो नाममत्तं पवत्तति। परमत्थतो पनेत्थ पुग्गलो नूपलब्भति।

२, १२ राजा आह-किमत्थिका भन्ते नागसेन तुम्हाकं पब्बज्जा को च तुम्हाकं परमत्थो' ति ? थेरो आह-किं ति महाराज इदं दुक्खं निरुज्झेय्य, अञ्ञं च दुक्खं न उप्पज्जेय्या' ति। एतदत्था महाराज अम्हाकं पब्बज्जा। अनुपादा परिनिब्बानं खो पन अम्हाकं परमत्थो' ति।

२, १३ भन्ते नागसेन अत्थि कोचि मतो न पटिसन्दहतीति ? थेरो आह-सकिलेसो महाराज पटिसन्दहति, निक्किलेसो नप्पटिसन्दहति।

२, १५ किं लक्खणो भन्ते मनसिकारो किं लक्खणा पञ्ञा' ति ? ऊहनलक्खणो खो महाराज मनसिकारो, छेदनलक्खणा पञ्ञा' ति। यथा महाराज यवलावका वामेन हत्थेन यवकलापं गहेत्वा दक्खिणेन हत्थेन

दात्तं गहेत्वा यवं छिन्दन्ति एवमेव खो महाराज योगावचरो मनसिकारेण मानसं गहेत्वा पञ्ञाय किलेसे छिन्दति।

२, २३ अपि च ओभासनलक्खणा पञ्ञा। पञ्ञा महाराज उप्पज्जमाना अविज्जन्धकारं विधमेति, विज्जाभासं जनेति, ञाणालोकं विदंसेति, अरियसच्चानि पाकटानि करोति। ततो योगावचरो अनिच्चं' ति वा दुक्खं' ति वा सम्मप्पञ्ञाय पस्सति।

२, २२ ये केचि कुसला धम्मा सब्बे ते समाधिपमुखा। भासितं पेतं भगवता-'समाधि भिक्खवे भावेथ। समाहितो यथाभूतं पजानाति' इति।

२, २५ भन्ते नागसेन यो उप्पज्जति सो उदाहु अञ्ञो'ति? थेरो आह—न च सो न च अञ्ञो'ति। अहञ्ञेव खो महाराज दहरो अहोसिं तरुणो मन्दो उत्तानसेय्यको, अहञ्ञेव एतरहि महन्तो, इमञ्ञेव कायं निस्साय सब्बे ते एकसंगहिता'ति। यथा महाराज कोचिदेव पुरिसो पदीपं पदीपेय्य, कि सो सब्बरत्तिं दीपेय्य? किं नु खो या पुरिमे यामे अच्चि सा मज्झिमे यामे अच्चि? न हि भन्ते। या मज्झिमे यामे अच्चि सा पच्छिमे यामे अच्चि? न हि भन्ते। किं नु खो महाराज अञ्ञो सो अहोसि पुरिमे यामे पदीपो अञ्ञो मज्झिमे यामे पदीपो अञ्ञो पच्छिमे यामे पदीपो'ति? नहि भन्ते। तञ्ञेव निस्साय सब्बरत्तिं पदीपितो'ति। एवमेव खो महाराज धम्मसन्तति सन्दहति, अञ्ञो उपज्जति, अञ्ञो निरुज्झति, अपुब्बं अचरिमं विय संदहति, तेन न च सो न च अञ्ञो पुरिमविञ्ञाणे पच्छिमविञ्ञाणं संगहं गच्छतीति। यथा महाराज खीरतो दधि, दधितो नवनीतं, नवनीततो घतं'ति।

२, २६ नत्थि महाराज अरहतो अनुनयो वा पटिघो वा। न च अरहन्तो अपक्कं पातेन्ति। परिपाकं आगमेन्ति। भासितं पेतं महाराज थेरेन सारिपुत्तेन धम्मसेनापतिना—

'नाभिनन्दामि मरणं नाभिनन्दामि जीवितं।
कालं च पटिकंखामि सम्पजानो पटिस्सतो॥' इति।

२, ३१ नामरूपं खो महाराज पटिसन्दहति। इमिना नामरूपेन कम्मं करोति सोभनं वा पापकं वा, तेन कम्मेन अञ्ञं नामरूपं पटिसन्दहति।

यथा महाराज कोचिदेव पुरिसो अञ्ञतरस्स पुरिसस्स अम्बं अवहरेय्य सो एवं वदेय्य—नाहं इमस्स अम्बे अवहरामि। अञ्ञे ते अम्बा ये इमिना रोपिता, अञ्ञे ते अम्बा ये मया अवहटा। अपि सो पुरिसो दण्डपत्तो भवेय्य।

२, ३३ महाराज ओळारिकं एतं रूपं, ये सुखुमा चित्तचेतसिका धम्मा एतं नामं'ति। उभो ते अञ्ञमञ्ञूपनिस्सिता। यथा महाराज कुक्कुटिया कललं न भवेय्य अण्डं पि न भवेय्य। यथा महाराज बीजं न भवेय्य अंकुरो पि न भवेय्य इति।

२, ३५ महाराज अतीतस्स अनागतस्स पच्चुप्पन्नस्स अद्धानस्स अविज्जा मूलं। एतस्स पुरिमा कोटि न पञ्ञायति।

४, ६३-८३ भन्ते नागसेन किं एकन्तसुखं निब्बानं, उदाहु दुक्खेन मिस्सं ति? एकान्तसुखं महाराज निब्बानं दुक्खेन अमिस्सं। यथा महाराज अत्थिधम्मे एव महासमुद्दे न सक्का उदकं परिगणेतुं, एवमेव खो महाराज अत्थिधम्मस्सेव निब्बानस्स न सक्का रूपं वा सण्ठानं वा वयं वा पमाणं वा ओपम्मेन वा कारणेन वा हेतुना वा नयेन वा उपदस्सयितुं। सरूपतो महाराज नत्थि (उपदस्सयितुं), गुणतो पन महाराज सक्का किंचि उपदस्सयितुं। यथा महाराज पदुमं अनुपलित्तं उदकेन, एवमेव खो महाराज निब्बानं सब्बकिलेसेहि अनुपलित्तं। उदकं इव महाराज निब्बानं सीतलं सब्बकिलेसपरिळाहनिब्बापनं कामतण्हाभवतण्हाविभवतण्हापिपासाविनयनं च। निब्बानं च महाराज महासमुद्दं इव महन्तं अनोरपारं अरहन्तानं खीणासवानं आवासो। गिरिसिखरं इव महाराज निब्बानं अच्चुग्गतं अचलं दुरधिरोहं। निब्बानं न अतीतं न अनागतं न पच्चुप्पन्नं न उप्पन्नं न अनुप्पन्नं न उप्पादनीयं। अत्थे सा महाराज निब्बानधातु सन्ता सुखा पणीता तं सम्मापटिपन्नो जिनानुसिट्ठिया संखारे सम्मसन्तो पञ्ञाय सच्छिकरोति। अनीतितो निरुपद्दवतो अभयतो खेमतो सन्ततो सुखतो साततो पणीततो सुचितो सीतलतो निब्बानं दट्ठब्बम्।



द्वितीयः परिच्छेदः

महायानवैपुल्यसूत्राणि

(१)

ललितविस्तरसूत्रम्

ज्ञानोदधिं शुद्धमहानुभावं धर्मेश्वरं सर्वविदं मुनीशम् ।
प्रशान्तकायं नरदेवपूज्यं मुनिं समाश्लिष्यत शाक्यसिंहम् ॥
आलोकभूतं तमतुल्यधर्मं तमोनुदं सन्नयवेदितारम् ।
शान्तक्रियं बुद्धममेयबुद्धिं भक्त्या समस्ता उपसंक्रमध्वम् ॥
स वैद्यराजोऽमृतभैषजप्रदः स वादिशूरः कुगणिप्रतापकः ।
स धर्मबन्धुः परमार्थकोविदः स नायकोऽनुत्तरमार्गदेशकः ॥

स सद्धर्मं देशयति स्म । आदौ कल्याणं मध्ये कल्याणं पर्यवसाने कल्याणं स्वर्थं सुव्यञ्जनं केवलं परिपूर्णं परिशुद्धं पर्यवदातं ब्रह्मचर्यं संप्रकाशयति स्म ।

इदं तथागतो विज्ञापयति । श्रद्धायामानन्द ! योगः करणीयः । ये केचिन् मम श्रद्धास्यन्ति तानहमुपाददामि । मित्राणीव ते मम शरणं गताः ।

देवातिदेव अहु उत्तमु सर्वदेवैः देवो न मेऽस्ति सदृशः कुत उत्तरो वा ?
ज्वलितं त्रिभवं जरव्याधिदुखैः मरणाग्निप्रदीप्तमनाथमिदम् ।
गिरिनद्यसमं लघुशीघ्रजवं व्रजतायु जगे यथ विद्यु नभे ॥
सभया सुपिना सद वैरकरा बहुशोकउपद्रव कामगुणाः ।
असिधारसमा विषपत्रिनिभा जहिता आर्यजनैः विदितार्यजनैः ॥

धिग् यौवनेन जरया समभिद्रुतेन आरोग्य धिग् विविधव्याधिपराहतेन ।
धिग् जीवितेन विदुषो न चिरस्थितेन धिक् पण्डितस्य पुरुषस्य रतिप्रसङ्गैः ॥

(तथागतस्तु—)
अवाप्य बोधिं अजरामरं पदं तर्पिष्यते धर्मजलैरिमां प्रजाम् ।
स्वयं तरित्वा च अनन्तकं जगत् स्थले स्थपिष्ये अजरामरे शिवे ॥

(इमां प्रजां) संसारसागरात् पारमुत्तार्य अनुत्तरे क्षेमे अभये

अशोके निरुपद्रवे शिवे विरजसे अमृते धर्मधातौ प्रतिष्ठापयिष्यति।

अथ खलु भगवान् बोधिवृक्षमूले प्रथमाभिसम्बुद्धः। अविद्याप्रत्ययाः संस्काराः, संस्कारप्रत्ययं विज्ञानं, विज्ञानप्रत्यये नामरूपे, नामरूपप्रत्ययानि षडायतनानि, षडायतनप्रत्ययः स्पर्शः, स्पर्शप्रत्यया वेदना, वेदनाप्रत्यया तृष्णा, तृष्णाप्रत्ययमुपादानं, उपादानप्रत्ययो भवः, भवप्रत्यया जातिः, जातिप्रत्यये जरामरणे इत्येवमस्य महतो दुःखस्कन्धस्य समुदयो भवति। अविद्यानिरोधात् संस्कारनिरोधः, संस्कारनिरोधाद् विज्ञाननिरोधः, विज्ञाननिरोधान्नामरूपनिरोधः, नामरूपनिरोधात् षडायतननिरोधः, षडायतननिरोधात् स्पर्शनिरोधः, स्पर्शनिरोधात् वेदनानिरोधः, वेदनानिरोधात् तृष्णानिरोधः, तृष्णानिरोधादुपादाननिरोधः, उपादाननिरोधाद्भवनिरोधः, भवनिरोधाज्जातिनिरोधः, जातिनिरोधाज्जरामरणनिरोधः इत्येवमस्य महतो दुःखस्कन्धस्य निरोधो भवति। दुःखनिरोधगामिनी प्रतिपत् तथागतेनाभिसम्बुद्धा। इयमेवार्याष्टाङ्गिको मार्गः—सम्यक् दृष्टिः, सम्यक् संकल्पः, सम्यक् वाक्, सम्यक् कर्मान्तः, सम्यगाजीवः, सम्यग्व्यायामः, सम्यक् स्मृतिः, सम्यक् समाधिश्चेति। इमानि खलु भिक्षवश्चत्वारि आर्यसत्यानि—यदिदं दुःखमार्यसत्यम्, अयञ्च दुःखसमुदय आर्यसत्यम्, अयञ्च दुःखनिरोध आर्यसत्यम्, इयञ्च दुःखनिरोधगामिनी मध्यमा प्रतिपदार्यसत्यम्।

गम्भीरः खल्वयं मया धर्मोऽभिसम्बुद्धः प्रशान्तः सूक्ष्मो निपुणो दुरनुबोधः अतर्को विरागः पण्डितवेदनीयो दुर्दृश्यः सर्वसंस्कारोपशमः परमार्थोऽनभिलप्यो निर्वाणम्।

(२)

अष्टसाहस्रिकाप्रज्ञापारमितासूत्रम्

आकाशमिव निर्लेपां निष्प्रपञ्चां निरक्षराम्।
यस्त्वां पश्यति भावेन स पश्यति तथागतम्॥
त्वां प्राप्य प्रलयं यान्ति दोषा वादाश्च वादिनाम्।
मार्गस्त्वमेका मोक्षस्य नास्त्यन्य इति निश्चयः॥
व्यवहारं पुरस्कृत्य प्रज्ञप्त्यर्थं शरीरिणाम्।
कृपया लोकनाथैस्त्वमुच्यसे नहि चोच्यसे॥

बोधिसत्वो न रूपे चरति न रूपनिमित्ते चरति न रूपं निमित्तमिति चरति न रूपस्य निरोधे चरति न रूपस्य विनाशे चरति न रूपं शून्यमिति चरति नाहं बोधिसत्व इति चरति। एवं न वेदनायां न संज्ञायां न संस्कारेषु न विज्ञाने न सर्वधर्मेषु चरति। य एवं चरति स प्रज्ञापारमितायां चरति। स हि चरन् चरामीति नोपैति, न चरामीति नोपैति, चरामि च न चरामि चेति नोपैति, नैव चरामि न चरामीति नोपैति। तत्कस्य हेतोः नोपैति ? सर्वधर्मा ह्यनुपगता अनुत्पन्नाः।

सर्वधर्मा अपि मायोपमाः स्वप्नोपमाः। सम्यक्सम्बुद्धोपि मायोपमः। निर्वाणमपि मायोपमं स्वप्नोपममिति वदामि किं पुनरन्यद्धर्मम्। यदि निर्वाणादप्यन्यः कश्चिद्धर्मो विशिष्टतरः स्यात् तमप्यहं मायोपमं स्वप्नोपममिति वदेयम्।

स चेत् तथागतोऽर्हन् सम्यक्सम्बुद्धोऽनन्तविज्ञप्तिघोषेण गम्भीरनिर्घोषेण स्वरेण गङ्गानदीबालुकोपमान् कल्पानपि वितिष्ठमानः सत्वः सत्व इति वाचं भाषेत अपि न तत्र कश्चित् सत्व उत्पन्नो वा उत्पस्यते वा उत्पद्यते वा निरुद्धो वा निरोत्स्यते वा निरुध्यते वा, आदिपरिशुद्धत्वात् सत्वस्य।

न च स कश्चित् सत्वो यः परिनिवृतो येन च परिनिर्वापितो भवति। धर्मतैषा सुभूते! धर्माणां मायाधर्मतामुपादाय स्यात्।

विग्रहा विवादा विरोधाः प्रज्ञापारमितायास्तेजसा बलेन चिप्रमेवोपरंस्यन्ति उपशमिष्यन्ति। यावन्ति खलु पुनः सुभूते! निमित्तानि तावन्तः सङ्गाः। निमित्ततो हि सुभूते! सङ्गः। या च सर्वधर्माणां प्रकृतिविविक्तता सा प्रज्ञापारमिता। अकृताः सर्वधर्माः तथागतेनाभिसम्बुद्धाः। एवमेताः सर्वाः सङ्गकोट्यो विवर्जिता भवन्ति।

सर्वं हि संस्कृतमनित्यं सर्वं भयावगतं दुःखं, सर्वं त्रैधातुकं शून्यं, सर्वधर्मा अनात्मानस्तदेवं सर्वमशाश्वतमनित्यं दुःखं विदित्वा पंडितैरिहैव स्रोतसापत्तिफलं सकृदागामिफलं अर्हत्वं इहैव प्राप्तव्यम्।

यथा सुभूते! महासमुद्रगतायां नावि भिन्नायां ये तत्र काष्ठं वा फलकं वा मृतशरीरं वा न गृह्णन्ति नाध्यालम्बन्ते वेदितव्यमेतत् अप्राप्ता एवैते पारमुदके कालं करिष्यन्तीति। ये खलु गृह्णन्ति ते पारमुत्तरिष्यन्ति

अक्षताश्च स्थले स्थास्यन्तीति। एवमेव सुभूते। यो बोधिसत्वः प्रज्ञापारमितां नाध्यालम्बते वेदितव्यमेतत् सुभूते! अन्तरे वैष अध्वनि व्यवसादमापत्स्यते अप्राप्त एव सर्वज्ञतां श्रावकत्वे प्रत्येकबुद्धत्वे वा स्थास्यतीति। ये आलम्बन्ते ते च प्रज्ञापारमितां प्राप्य सर्वज्ञतायां स्थास्यन्ति चानुत्तरां सम्यक्सम्बोधिमभिसंभोत्स्यन्ति। यथा चापरिपक्वेन घटेनोदकं परिवहेत् क्षिप्रमेव घटः प्रविलेष्यते, सुपरिपक्वेन घटेनोदकं परिवहतो घटो गृहं गमिष्यतीति (तथैव सुपरिपक्वप्रज्ञापारमिताश्रयेण बोधिसत्वः कृतकृत्यो भवतीति।)

सर्वधर्माणां धर्मता अनभिलप्या। सर्वधर्मा अपि अनभिलप्याः। या च सुभूते! सर्वधर्माणां शून्यता न सा शक्याऽभिलपितुम्। यः प्रज्ञापारमितायां चरति स परमार्थे चरति न निमित्ते चरति। गम्भीरोऽयं प्रतीत्यसमुत्पादः। सर्वधर्माश्च नाममात्रेण व्यवहारमात्रेण अभिलप्यन्ते। सर्वधर्माः नागच्छन्ति न गच्छन्ति न रज्यन्ते न विरज्यन्ते असक्ताः संगासंगविगताः ब्रह्मभूताः। या च शून्यता स तथागतः। तथागताः न गताः नागताः। सर्वधर्मा असंक्लेशा अव्यवदानाः स्वभावेन शून्या इति प्रज्ञापारमिताऽनुगन्तव्या।

ये धर्मा हेतुप्रभवा हेतुं तेषां तथागतो ह्यवदत्। तेषां च यो निरोध एवंवादी महाश्रमणः।

(३)

शतसाहस्रिकाप्रज्ञापारमितासूत्रम्

या सर्वज्ञतया नयत्युपशमं शान्त्यैषिणः श्रावकान्
या मार्गज्ञतया जगद्धितकृतालोकार्थसम्प्रापिका।
सर्वाकारमिदं वदन्ति मुनयो विश्वं यया सङ्गतम्
तस्यै श्रावकबोधिसत्वगणिनो बुद्धस्य मात्रे नमः॥

त्रीणि रत्नानि बुद्धो धर्मः सङ्घश्चेति। चत्वार्यार्यसत्यानि दुःखं समुदयो निरोधो मार्गश्चेति। पञ्चस्कन्धाः रूपं वेदना संज्ञा संस्काराः विज्ञानं चेति। षट्पारमिताः दानं शीलं क्षान्तिः वीर्यं ध्यानं प्रज्ञा चेति।

चत्वारो ब्रह्मविहाराः मैत्री करुणा मुदितोपेक्षा चेति।

चत्वारि ध्यानानि प्रथमं ध्यानं वितर्को विचारः प्रीतिः सुखं चित्तैकाग्रतेति पञ्चाङ्गम्। द्वितीयं ध्यानं आत्मसम्प्रसादः प्रीतिः सुखं चित्तैकाग्रतेति चतुरंगम्। तृतीयं ध्यानं उपेक्षा स्मृतिः सम्प्रजन्यं सुखं चित्तैकाग्रतेति पञ्चाङ्गम्। चतुर्थं ध्यानं उपेक्षा परिशुद्धिः स्मृतिःअदुःखासुखा वेदना चित्तैकाग्रता चेति चतुरंगम्।

विविक्तं कामैर्विविक्तं पापकैरकुशलैर्धर्मैः सवितर्कं सविचारं विवेकजं प्रीतिसुखं प्रथमं ध्यानमुपसंपद्य विहरति। सवितर्कसविचाराणां व्युपशमात् अध्यात्मसम्प्रसादात् चेतस एकोतिभावात् अवितर्कं अविचारं समाधिजं प्रीतिसुखं द्वितीयं ध्यानमुपसंपद्य विहरति। प्रीतेर्विरागादुपेक्षकः स्मृतिमान् सुखविहारी निष्प्रीतिकं तृतीयं ध्यानमुपसंपद्य विहरति। सुखस्य च प्रहाणाद् दुःखस्य च प्रहाणात् पूर्वमेव च सौमनस्यदौर्मनस्ययोरस्तंगमाद् अदुःखासुखं उपेक्षास्मृतिपरिशुद्धं चतुर्थं ध्यानमुपसंपद्य विहरति।

त्रयः समाधयः शून्यतासमाधिरानिमित्तसमाधिरप्रणिहितसमाधिश्च। स्वलक्षणशून्यान् सर्वधर्मान् प्रत्यवेक्षमाणस्य या चित्तस्य स्थितिः शून्यता विमोक्षसुखमयमुच्यते शून्यतासमाधिः। आनिमित्तान् सर्वधर्मान् प्रत्यवेक्षमाणस्य या चित्तस्य स्थितिरानिमित्तविमोक्षसुखमयमुच्यते आनिमित्तः समाधिः। सर्वधर्मा अनभिसंस्कारा इत्यनभिसंस्कुर्वतो या चित्तस्य स्थितिरप्रणिहितविमोक्षसुखमयमुच्यतेऽप्रणिहितः समाधिः।

शून्याः सर्वधर्माः मायोपमा अनुत्पन्ना अनिरुद्धाः। न हानिर्न वृद्धिर्न संक्लेशो न व्यवदानम्। न सर्वधर्मशून्यतां भाव इति नाभाव इति योजयति न नित्येति नानित्येति न सुखमिति न दुःखमिति नोत्पाद इति न निरोध इति न शून्य इति नाशून्य इति योजयति।

यश्च प्रज्ञप्तिधर्मं तस्य नोत्पादो न निरोधोऽन्यत्र संज्ञासंकेतमात्रेण व्यवह्रियते। नामरूपमेव शून्यता शून्यतैव नामरूपम्। रूपमेव माया मायैव रूपम्। मायायाः पदं न विद्यते। सर्वमेतद्द्वयमद्वैधीकारम्।

(४)

दशभूमिकसूत्रम्

यस्मिन् पारमिता दशोत्तमगुणास्तैस्तैर्नयैः सूचिता:(१)
सर्वज्ञेन जगद्धिताय दश च प्रख्यापिता भूमयः।
उच्छेदध्रुववर्जिता च विमला प्रोक्ता गतिर्मध्यमा
तत्सूत्रं दशभूमिकं निगदितं श्रृण्वन्तु बोध्यर्थिनः ॥

प्रमुदिता, विमला, प्रभाकरी, अर्चिष्मती, सुदुर्जया, अभिमुखी, दूरङ्गमा, अचला, साधुमती, धर्ममेघा च नाम बोधिसत्वभूमयः दशेमाः।

प्रमुदितायां बोधिसत्वभूमौ स्थितो बोधिसत्वः प्रामोद्यबहुलो भवति प्रसादबहुलोऽविहिंसाबहुलः प्रीतिबहुल उदग्रीबहुल उत्साहबहुलोऽक्रोधबहुलो भवति। व्यावृत्तोऽस्मि सर्वजगद्विषयादवतीर्णोऽस्मि बुद्धभूमिसमीपमिति प्रामोद्यमुत्पादयति।

विमलायां बोधिसत्वभूमौ स्थितो बोधिसत्वः प्रकृत्यैव दशभिः कुशलैः कर्मपथैः(२) समन्वागतो भवति। सम्यग्दृष्टिः खलु पुनर्भवति।

बोधिसत्वस्तृतीयायां (प्रभाकर्यां) बोधिसत्वभूमौ स्थितोऽनित्यतां सर्वसंस्कारगतस्य यथाभूतं प्रत्यवेक्षते दुःखतां चाशुभताञ्च क्षणिकोत्पादनिरोधताञ्च। भूयस्या मात्रया सर्वसंस्कारेभ्यश्चित्तमुच्चालयति तथागतज्ञाने च संप्रेषयति। मैत्रीकरुणामुदितोपेक्षासहगतेन चित्तेन भवति। दृष्टिकृतबन्धनानि च पूर्वमेव प्रहीणानि भवन्ति।

अर्चिष्मत्यां स्थितस्य सत्कायदृष्टिपूर्वंगमानि आत्मसत्वजीवपुरुष-

---

(१) प्रायेण षडेव पारमिता उल्लिखिताः। क्वचिच्च दशेति यथाऽत्र। दानशीलक्षान्तिवीर्यध्यानप्रज्ञापारमिताः षट्। येषां मते दश ते उपायप्रणिधिबलज्ञानपारमिताः चतस्रश्चाधिकं गणयन्ति। अन्ये तु उपायस्य दानशीलक्षान्तिषु प्रणिधेर्ध्याने बलस्य वीर्ये ज्ञानस्य च प्रज्ञायामन्तर्भावात् षडेव ता इति वदन्ति।

(२) अहिंसा चौर्यविरतिः परदारविवर्जनम्। मिथ्यापैशुन्यपारुष्याबद्धवादेषु संयमः ॥ लोभव्यापादनास्तिकदृष्टीनां परिवर्जनम्। एते कर्मपथाः शुक्ला दश कृष्णा विपर्ययात् ॥ रत्नावली ८-९.

पुद्गलस्कन्धधात्वायतनाभिनिवेशसमुच्छ्रितानि वितर्काणि सर्वाणि विगतानि भवन्ति।

सुदुर्जयायां स्थित आर्यसत्यानि यथाभूतं प्रजानाति। संवृतिसत्यकुशलः परमार्थसत्यकुशलश्च भवति। सर्वं संस्कृतं रिक्तं तुच्छं मृषा मोषधर्माविसंवादकं बालालापनमिति यथाभूतं प्रजानाति।

अभिमुख्यां स्थितो यावत्यो लोकसमुदाचारोपपत्तयः सर्वास्ताः आत्माभिनिवेशतो भवन्तीति जानाति। प्रतीत्यसमुत्पादं यथाभूतं प्रत्यवेक्षते। चित्तमात्रमिदं यदिदं त्रैधातुकम्। तस्य भूयस्या मात्रया महाकरुणा अभिमुखी भवति। प्रज्ञापारमिताप्राप्तो भवति।

दूरंगमायां स्थितः शून्यतानैरात्म्ययुक्तो भवति। न च कंचिद्धर्मं अभिनिविशते। अस्य दश पारमिताः क्षणे क्षणे परिपूर्यन्ते। एवं चत्वारि संग्रहवस्तूनि (१) सर्वबोध्यङ्गकाः धर्माः क्षणे क्षणे परिपूर्यन्ते। तस्य कर्म निमित्तापगतं प्रवर्तते।

अचलायां स्थितः सर्वधर्माणामजातताञ्चालक्षणताञ्चाविनाशिताञ्च यथाभूतामवतरति। सर्वधर्मसमताप्राप्तो भवति। धर्मधातौ विचरति।

साधुमत्यां स्थितः कुशलाकुशलाव्याकृतधर्माभिसंस्कारञ्च यथाभूतं प्रजानाति। बोधिसत्त्ववाचा धर्मं देशयति। तथागतधर्मकोशं रक्षति। समाहितस्तथागतदर्शनं न विजहाति। भूयस्या मात्रया रात्रिं दिवं गम्भीरबोधिसत्त्वविमोक्षानुप्राप्तो भवति।

धर्ममेघायां सर्वाकारसर्वज्ञज्ञानाभिषेकभूमिप्राप्तो भवति। सर्वान् समाधीन् समापद्यते। तद्यथापि नाम भो जिनपुत्राः! यो राज्ञः चक्रवर्तिनः पुत्रो ज्येष्ठः कुमारः राजा तं कुमारं दिव्ये भद्रपीठे निषाद्य चतुर्भ्यो महासमुद्रेभ्य वारि आनीय महता पुष्पधूपगन्धदीपमाल्यविलेपनचूर्णचामरछत्रध्वजपताकातूर्यसंगीतिव्यूहेन सौवर्णं भृङ्गारं गृहीत्वा तेन वारिणा तं कुमारं मूर्धन्यभिषिञ्चति एवमेव भो जिनपुत्राः! बोधिसत्त्वो महासत्त्वस्तैर्बुद्धैर्भगवद्भिः महाज्ञानाभिषेकाभिषिक्तोऽप्रमेयगुणज्ञानविवर्धितो धर्ममेघायां बोधिसत्त्वभूमौ प्रतिष्ठित इत्युच्यते।

---

१. दानं प्रियवचनमर्थचर्या समानार्थता चेति।

(५)

लङ्कावतारसूत्रम्

नैरात्म्यं यत्र धर्माणां धर्मराजेन देशितम् ।
लङ्कावतारं तत्सूत्रमिह यत्नेन लिख्यते ॥
उत्पादभङ्गरहितो लोकः खपुष्पसन्निभः ।
सदसन्नोपलब्धस्ते प्रज्ञया कृपया च ते ॥ २।१
मायोपमाः सर्वधर्माश्चित्तविज्ञानवर्जिताः ।
सदसन्नोपलब्धास्ते प्रज्ञया कृपया च ते ॥ २, २
धर्मपुद्गलनैरात्म्यं क्लेशाज्ञेयश्च ते सदा ।
विशुद्ध आनिमित्तेन प्रज्ञया कृपया च ते ॥ २, ६

तद्यथा महामते ! मृत्परमाणुभ्यो मृत्पिण्डो न चान्यो नानन्यः यथा च भूषणं सुवर्णात् एवमेव महामते ! प्रवृत्तिविज्ञानानि आलयविज्ञानात् न चान्यानि न नानन्यानि। यदि अन्यानि स्युरनालयविज्ञानहेतुकानि स्युः । अथानन्यानि प्रवृत्तिविज्ञाननिरोध आलयविज्ञाननिरोधः स्यात् ।

तरङ्गा ह्युदधेर्यद्वत् पवनप्रत्ययेरिताः ।
नृत्यमानाः प्रवर्तन्ते व्युच्छेदश्च न विद्यते ॥ २, ६६
आलयौघस्तथा नित्यो विषयपवनेरितः ।
चित्रैस्तरङ्गविज्ञानैर्नृत्यमानः प्रवर्तते ॥ २, १००
न चान्याश्च नानन्यास्तरङ्गा ह्युदधेर्मताः ।
विज्ञानानि तथा सप्त चित्तेन सह संयुताः ॥ २, १०२
चित्तेन चीयते कर्म मनसा च विधीयते ।
विज्ञानेन विजानाति दृश्यं कल्पेति पञ्चभिः ॥ २, १०६
चित्तं मनश्च विज्ञानं लक्षणार्थं प्रकल्प्यते ।
अभिन्नलक्षणा ह्यष्टौ न लक्ष्या न च लक्षणम् ॥ २, १०४

तथागतगर्भः पुनर्भगवता प्रकृतिप्रभास्वरः विशुद्ध्यादिविशुद्धः सर्वसत्वदेहान्तर्गतः महार्घरत्नं मलिनवस्तुपरिवेष्टितमिव स्कन्धधात्वायतनवस्तुपरिवेष्टितो रागद्वेषमहाभूतपरिकल्पमलमलिन इव नित्यो ध्रुवः

शिवः शाश्वतश्च वर्णितः। तत् कथमयं भगवन् ! तीर्थकरात्मवादतुल्यस्तथागतगर्भवादो न भवति ? तीर्थकरा अपि भगवन् ! नित्यः कर्ता निर्गुणो विभुरव्यय इति आत्मवादोपदेशं कुर्वन्ति । भगवानाह न हि महामते ! तीर्थकरात्मवादतुल्यो मम तथागतगर्भोपदेशः। तथागता अर्हन्तः सम्यक् सम्बुद्धा बालानां नैरात्म्यसंत्रासपदविवर्जनार्थं निर्विकल्पं निराभासप्रज्ञागोचरं तथागतगर्भं सुखोपदेशेन देशयन्ति। न चात्र महामते ! बोधिसत्वैः आत्माभिनिवेशः कर्तव्यः। परमार्थस्तु महामते ! आर्यज्ञानप्रत्यात्मगतिगम्यो न वाग्विकल्पबुद्धिगोचरस्तेन विकल्पो नोद्भावयति परमार्थम्। महामते ! चतुष्टयविनिर्मुक्ता तथागतानां धर्मदेशना। चातुष्कोटिकं च महामते ! लोकव्यवहारः। यत् सर्वप्रपञ्चातीतं स तथागतः।

बुद्ध्या विविच्यमानानां स्वभावो नावधार्यते।
तस्मादनभिलप्यास्ते निःस्वभावाश्च देशिताः॥ २, १७५
चित्तं विषयसम्बन्धं ज्ञानं तर्के प्रवर्तते।
निराभासेऽविशेषे च प्रज्ञा वै संप्रवर्तते॥ २, १८२

धर्मपुद्गलनैरात्म्यावबोधान् महामते ! आवरणद्वयपरिज्ञानावबोधाच्च च्युतिद्वयाधिगमात् क्लेशद्वयप्रहाणात् च महामते ! बुद्धानां भगवतां बुद्धता भवति।

याञ्च रात्रिं तथागतोऽभिसम्बुद्धो याञ्च रात्रिं परिनिर्वास्यति अत्रान्तरे एकमप्यक्षरं तथागतेन नोदाहृतं न प्रव्याहरिष्यति अवचनं बुद्धवचनमिति। योऽक्षरपतितं धर्मं देशयति स प्रलपति निरक्षरत्वाद् धर्मस्येति। सर्वप्रपञ्चोपशमं तत्त्वमित्युच्यते। निरक्षरत्वात् तत्त्वस्य। अंगुल्या कश्चित् कस्यचित् किंचित् आदर्शयेत् स च बालः अंगुल्यग्रमेव प्रतिसरेद्वीक्षितुम्।

अंगुल्यग्रं यथा बालो न गृह्णाति निशाकरम्।
तथा ह्यक्षरसंसक्तास्तत्त्वं न वेत्ति मामकम्॥ ६, ३

वरं खलु सुमेरुमात्रा पुद्गलदृष्टि र्न त्वेव नास्त्यस्तित्वाभिमानिकस्य शून्यतादृष्टिः। नास्त्यस्तित्वाभिमानिको हि महामते ! वैनाशिको भवति।

न सन्नासन्न सदसद्यदा लोकं प्रपश्यति।
तदा व्यावर्तते चित्तं नैरात्म्यं चाधिगच्छति॥ ३, २२

विकल्पमात्रं त्रिभवं बाह्यमर्थं न विद्यते ।
चित्तमात्रावतारेण प्रज्ञा ताथागती मता ॥ ३, ४३, ७७
जल्पप्रपञ्चाभिरता हि बालास्तत्वे न कुर्वन्ति मतिं विशालाम् ।
जल्पो हि त्रैधातुकदुःखयोनिस्तत्वं हि दुःखस्य विनाशहेतुः ॥ ३, ७३

(६)

सद्धर्मपुण्डरीकसूत्रम्

गम्भीरं शारिपुत्र ! दुर्दृश्यं दुरनुबोधं बुद्धज्ञानं तथागतैरर्हद्भिः प्रतिबुद्धम् । अलं शारिपुत्र ! अनेनार्थेन प्रकाशितेन, उत्त्रसिष्यति शारिपुत्र ! अयं सदेवको लोकोऽस्मिन्नर्थे व्याक्रियमाणेऽभिमानप्राप्ताश्च भिक्षवो महाप्रपातं प्रपतिष्यन्ति । अतर्कोऽतर्कावचरस्तथागतविज्ञेयः शारिपुत्र ! सद्धर्मः।

तथागताः अर्हन्तः सम्यक्सम्बुद्धाः बहुजनहिताय बहुजनसुखाय लोकानुकम्पायै महतो जनकायस्यार्थाय हिताय सुखाय देवानाञ्च मनुष्याणाञ्च नानानिरुक्तिनिर्देशाभिलापनिर्देशनैः विविधैः उपायकौशल्यैः सद्धर्मं संप्रकाशयन्ति ।

यस्तु शून्यान् विजानाति धर्मानात्मविवर्जितान् ।
सम्बुद्धानां भगवतां बोधिं जानाति तत्त्वतः ॥ ५, ५१
एवं सत्त्वा महाऽज्ञानात् जात्यन्धाः संसरन्ति हि ।
प्रतीत्योत्पादचक्रस्य अज्ञानाद् दुःखधर्मिणः ॥ ५, ५६
यश्च धर्मान् विजानाति मायास्वप्नस्वभावकान् ।
कदलीस्कन्धनिःसारान् प्रतिश्रुत्कासमानकान् ॥ ५, ७६
तत्स्वभावं च जानाति त्रैधातुकमशेषतः ।
अबद्धमविमुक्तञ्च स विजानाति निर्वृतिम् ॥ ५, ८०
सर्वधर्माः समाः सर्वे समाः समसमाः सदा ।
एवं ज्ञात्वा विजानाति निर्वाणममृतं शिवम् ॥ ५, ८२

(७)

समाधिराजसूत्रम्

अनिरुद्धमनुत्पन्नमनाविलमनक्षरम् ।
महायानमहं स्तोष्ये बुद्धज्ञानाभिवाञ्छया ॥

तारकं सर्वसत्वानां घोरात् संसारसागरात् ।
संस्थापकञ्च निर्वाणे शान्ते क्षेमे निरुत्तरे ॥

ज्ञानेन जानाम्यहु स्कन्धशून्यतां ज्ञात्वा च क्लेशेहि न संवसामि ।
व्याहारमात्रेण च व्याहरामि परिनिर्वृतो लोकमिमं चरामि ॥
नीतार्थतो जानति सर्वधर्मान् यथोपदिष्टा सुगतेन शून्यता ।
नेयार्थतो जानति सर्वधर्मान् यस्मिन् पुनः पुद्गल सत्वपूरुषो ॥
आदर्शपृष्ठे यथ तैलपात्रे निरीक्षते नारिमुखं अलंकृतम् ।
सो तत्र रागं जनयित्व बालो प्रधावितो काम गवेषमाणो ॥
मुखस्य संक्रान्ति तदा न विद्यते बिम्बे मुखं नैव कदाचि लभ्यते ।
यथा स मूढो जनयेत रागं तथोपमान् जानथ सर्वधर्मान् ॥
यथैव गन्धर्वपुरं मरीचिका यथैव माया सुपिनं यथैव ।
स्वभावशून्या तु निमित्तभावा तथोपमान् जानथ सर्वधर्मान् ॥
यथा कुमारी सुपिनान्तरेऽस्मिन् स्वपुत्र जातञ्च मृतञ्च पश्यति ।
जातेऽतितुष्टा मृत दौर्मनस्यिता तथोपमान् जानथ सर्वधर्मान् ॥
निवृत्तिधर्माण न अस्तिधर्मा येनेति नास्ति न हि जातु अस्ति ।
अस्तीति नास्तीति च कल्पनावतां एवं चरन्तान न दुःख शाम्यति ॥
अस्तीति नास्तीति उभे पि अन्ता शुद्धी अशुद्धीति इमे पि अन्ता ।
तस्मादुभे अन्त विवर्जयित्वा मध्ये पि स्थानं न करोति पण्डितः ॥
अस्तीति नास्तीति विवाद एष शुद्धी अशुद्धीति अयं विवादः ।
विवादप्राप्त्या न दुखं निरुध्यते स्मृतेरुपस्थान कथं कथेत्वा ॥
बहू जनो भाषति स्कन्धशून्यतां न च प्रजानन्ति यथा निरात्मकाः ।
ते अप्रजानन्त परेहि चोदिता क्रोधाभिभूताः परुषं वदन्ति ॥
कियच्चिरं बाल सुसेविता पि पुनोपि ते भोन्ति अमित्रसन्निभाः ।
न विज्ञ बालेहि करोन्ति विग्रहं सत्कृत्य बालान् परिवर्जयन्ति ॥
गृहीत्व भैषज्य पृथूवराणां न सेवते आतुरु येन मुच्यते ।
न वैद्यदोषो न च भैषजानां तस्यैव दोषो भवि आतुरस्य ॥

(८)

सुवर्णप्रभाससूत्रम्

यदा स्रोतःसु गंगायाः रोहेयुः कुसुमानि च ।

तदा सर्षपमात्रं च व्यक्तं धातुर्भविष्यति ॥
यदा शशविषाणेन निःश्रेणी सुदृढा भवेत् ।
स्वर्गस्यारोहणार्थाय तदा धातुर्भविष्यति ॥
धर्मकायो हि सम्बुद्धो धर्मधातुस्तथागतः ।
ईदृशो भगवान् काय ईदृशी धर्मदेशना ॥
शून्या हि ते ते खलु सर्वधर्माः अविद्यतः प्रत्ययसंभवाश्च ।
ज्ञानासिना छिन्दथ क्लेशजालं स्पृशत तं बोधिगुणं ह्युदारम् ॥
वयं हि हन्मो वरधर्मभेरीं आपूरयामो वरधर्मशङ्खम् ।
प्रज्ज्वालयामो वरधर्मउल्काम् सुवर्षयामो वरधर्मवर्षम् ॥

अन्यानि महायानसूत्राणि

(१)

वज्रच्छेदिका

निर्जाता हि सुभूते ! तथागतानां सम्यक्सम्बोधिरतो निर्जाताश्च बुद्धाः भगवन्तः । एष सुभूते ! अनुत्पादः परमार्थः । तथागत इति सुभूते ! उच्यते न कचिद् गतो न कुतश्चिदागतः ।

(२)

नैरात्म्यपरिपृच्छा

भ्रमन्ति चक्रवन्मूढा लोकधर्मसमावृताः ।
परमार्थं न जानन्ति भवो यत्र निरुध्यते ॥
अनित्याः सर्वसंस्कारा अध्रुवाः क्षणभंगुराः ।
अतश्च परमार्थज्ञो वर्जयेत् संवृतेः पदम् ॥
स्वर्गस्थाने तु ये देवा गन्धर्वाप्सरसादयः ।
च्युतिरस्ति च सर्वेषां तत् सर्वं संवृतेः फलम् ॥
अतः सर्वमिदं त्यक्त्वा दिव्यं स्वर्गमहासुखम् ।
भावयेत् सततं प्राज्ञो बोधिचित्तं प्रभास्वरम् ॥
निःस्वभावं निरालम्ब सर्वशून्यं निरालयम् ।
प्रपञ्चसमतिक्रान्तं बोधिचित्तस्य लक्षणम् ॥

(३)

राष्ट्रपालपरिपृच्छा

नेह माता न पिता न बान्धवा धारयन्ति यतमान दुर्गतिम् ।
यत्कृतं हि मनुजैः शुभाशुभं तत्प्रयान्तमनुयाति पृष्ठतः ॥
ये पापमित्राणि विवर्जयन्ति कल्याणमित्राणि सदा भजन्ति ।
वर्धन्ति ते बोधिपथेषु नित्यं यथ शुक्लपक्षे दिवि चन्द्रमंडलम् ।
बहुकल्पकोटिभिः कदाचि बुद्धो उत्पद्यते लोकहितो महर्षिः ।
लब्धोऽधुना स प्रवरः क्षणोऽद्य त्यज प्रमादं यदि मोक्षकामः ॥
भवचारके जगदवेक्ष इदं ह्यनाथं जातीजरामरणशोकहतं रुजार्तम् ।
समुदानयित्व प्रवरां शिवधर्मनावं ते तारयन्ति जनतां भवसागरौघात् ॥

(४)

मञ्जुश्रीपरिपृच्छा

येन मञ्जुश्रीरनुत्पादः सर्वधर्माणां दृष्टस्तेन दुःखं परिज्ञातम् । येन नास्तिता सर्वधर्माणां दृष्टा तस्य समुदयः प्रहीणः । येन अत्यन्तपरिनिर्वृताः सर्वधर्मा दृष्टास्तेन निरोधः साक्षात्कृतः । येन मञ्जुश्रीरभावः सर्वधर्माणां दृष्टस्तेन मार्गो भावितः ।[१]

(५)

शालिस्तम्बसूत्रम्

य इमं प्रतीत्यसमुत्पादं यथाभूतं सम्यक् प्रज्ञया शिवमभयमनाहार्यमव्ययमव्युपशमस्वभावं पश्यति न स पूर्वान्तं अपरान्तं वा प्रत्युत्पन्नं वा प्रतिसरति ।[२]

(६)

रत्नकूटसूत्रम्

वरं खलु काश्यप । सुमेरुमात्रा पुद्गलदृष्टिराश्रिता न त्वेवाभावाभिनिवेशिकस्य शून्यतादृष्टिः । तत् कस्य हेतोः ? सर्वदृष्टिकृतानां हि काश्यप !

१. चन्द्रकीर्तिना माध्यमिकवृत्तौ उद्धृता (५१६ पृष्ठे)

२. चन्द्रकीर्तिना माध्यमिकवृत्तौ उद्धृतम् (५९३ पृष्ठे)

शून्यता निःसरणम्। यस्य खलु पुनः शून्यतैव दृष्टिस्तमहमचिकित्स्यमिति वदामि। तद् यथा काश्यप! ग्लानः पुरुषः स्यात् तस्मै वैद्यो भैषज्यं दद्यात् तस्य तद् भैषज्यं सर्वदोषानुच्चार्य स्वयं कोष्ठगतं न निःसरेत्। तत् किं मन्यसे काश्यप! अपि तु स पुरुषस्ततो ग्लान्यान् मुक्तो भवेत्?[1]

शीलमायुष्मन्तो न संसरति न परिनिर्वाति। समाधिः प्रज्ञा आयुष्मन्तो न संसरति न परिनिर्वाति। एभिश्चायुष्मन्तो धर्मैर्निर्वाणं सूच्यते। एते च धर्माः शून्याः प्रकृतिविविक्ताः। संज्ञावेदयितनिरोधसमापत्तिमायुष्मन्तः समापद्यध्वम्। संज्ञावेदयितनिरोधसमापत्तिसमापन्नस्य भिक्षोर्नास्त्युत्तरीकरणीयम्।[2]

अथायुष्मान् सुभूतिस्तान् भिक्षूनेतदवोचत्। कुत्रायुष्मन्तो गताः कुतो वागताः? तेऽवोचन्—न क्वचिद् गमनाय न कुतश्चिदागमनाय भदन्त सुभूते! भगवता धर्मो देशितः। आह—को नामायुष्मतां शास्ता? आहुः—यो नोत्पन्नो न परिनिर्वास्यति। आह—कथं युष्माभिर्धर्मः श्रुतः? आहुः—न बन्धनाय न मोक्षाय। आह—केन यूयं विनीताः? आहुः—यस्य न कायो न चित्तम्। आह—कथं यूयं प्रयुक्ताः? आहुः—नाविद्याप्रहाणाय न विद्योत्पादनाय। आह—कस्य यूयं श्रावकाः? आहुः—येन न प्राप्तं नाभिसम्बुद्धम्। आह—के युष्माकं सब्रह्मचारिणः? आहुः—ये त्रैधातुके नोपविचरन्ति। आह—कृतं युष्माभिः करणीयम्? आहुः—अहंकारममकारपरिज्ञानतः। आह—क्षीणाः युष्माकं क्लेशाः? आहुः—अत्यन्तक्षयात् सर्वधर्माणाम्। आह—धर्षितो युष्माभिर्मारः? आहुः—स्कन्धमारानुपलंभात्। आह—परिचरितो युष्माभिः शास्ता? आहुः—न कायेन न वाचा न मनसा। आह—उत्तीर्णो युष्माभिः संसारः? आहुः—अनुच्छेदतोऽशाश्वततः। आह—प्रतिपन्ना युष्माभिर्दक्षिणीयभूमिः? आहुः—सर्वग्राहविनिर्मुक्तितः।[3]

---

१. चन्द्रकीर्तिना माध्यमिकवृत्तौ उद्धृतम् (२४८ पृष्ठे)

२. चन्द्रकीर्तिना माध्यमिकवृत्तौ उद्धृतम् (४८ पृष्ठे)

१. चन्द्रकीर्तिना माध्यमिकवृत्तौ उद्धृतम् (४९ पृष्ठे)

अश्वघोषः

(१)

सौन्दरनन्दम्

स्नेहेन कश्चिन् न समोऽस्ति पाशः स्रोतो न तृष्णासममस्ति हारि ।
रागाग्निना नास्ति समस्तथाग्निस्तच्चेत् त्रयं नास्ति सुखं च तेऽस्ति ॥ ५, २८
साधारणात् स्वप्ननिभादसारात् लोलं मनः कामसुखान् नियच्छ ।
हव्यैरिवाग्नेः पवनेरितस्य लोकस्य कामै र्न हि तृप्तिरस्ति ॥ ५, २३
तत् सौम्य लोलं परिगम्य लोकं मायोपमं चित्तमिवेन्द्रजालम् ।
प्रियाभिधानं त्यज मोहजालं छेत्तुं मतिस्ते यदि दुःखजालम् ॥ ५, ४५

चरन्नात्मारामो यदि च पिबति प्रीतिसलिलम् ।
ततो भुंक्ते श्रेष्ठं त्रिदशपतिराज्यादपि सुखम् ॥ १४, ५२
तज्जन्मनो नैकविधस्य सौम्य तृष्णादयो हेतव इत्यवेत्य ।
दुःखक्षयो हेतुपरिक्षयाच्च, शान्तं शिवं साक्षिकुरुष्व धर्मम् ॥ १६, २५-२६

यस्मिन् न जाति र्न जरा न मृत्यु र्न व्याधयो नाऽप्रियसंप्रयोगः ।
नेच्छाविपन् न प्रियविप्रयोगः क्षेमं पदं नैष्ठिकमच्युतं तत् ॥ १६, २७
दीपो यथा निर्वृतिमभ्युपेतो नैवावनिं गच्छति नान्तरिक्षम् ।
दिशं न कांचिद् विदिशं न कांचित् स्नेहक्षयात् केवलमेति शान्तिम् ॥ १६, २८
एवं कृती निर्वृतिमभ्युपेतो नैवावनिं गच्छति नान्तरिक्षम् ।

दिशं न कांचिद् विदिशं न कांचित् क्लेशक्षयात् केवलमेति शान्तिम् ॥ १६, २९
न मे प्रियं किंचन नाप्रियं मे न मेऽनुरोधोऽस्ति कुतो विरोधः ।
तयोरभावात् सुखितोऽस्मि सद्यो हिमातपाभ्यामिव विप्रमुक्तः ॥ १७, ६७
अवाप्तकार्योऽसि परां गतिं गतो न तेऽस्ति किंचित् करणीयमण्वपि ।

अतः परं सौम्य चरानुकम्पया विमोक्षयन् कृच्छ्रगतान् परानपि ॥ १८, ५४
अभ्यर्चनं मे न तथा प्रणामो, धर्मे यथैषा प्रतिपत्तिरेव ॥ १८, २२

इत्येषा व्युपशान्तये न रतये मोक्षार्थगर्भाकृतिः
श्रोतॄणां ग्रहणार्थमन्यमनसां काव्योपचारात् कृता ।

यन् मोक्षात् कृतमन्यदत्र हि मया तत् काव्यधर्मात् कृतं
पातुं तिक्तमिवौषधं मधुयुतं हृद्यं कथं स्यादिति ॥ १८, ६३

(२)

बुद्धचरितम्

रूपस्य हन्त्री व्यसनं बलस्य शोकस्य योनि र्निधनं रतीनाम् ।
नाशः स्मृतीनां रिपुरिन्द्रियाणामेषा जरा नाम ययैष भग्नः ॥ ३, ३०
आयुष्मतोऽप्येष वयःप्रकर्षो निःसंशयं कालवशेन भावी ।
एवं जरां रूपविनाशयित्रीं जानाति चैवेच्छति चैव लोकः ॥ ३, ३३
स्थूलोदरः श्वासचलच्छरीरः स्रस्तांसबाहुः कृशपाण्डुगात्रः ।
अम्बेति वाचं करुणं ब्रुवाणः परं समाश्रित्य नरः क एषः ॥ ३, ४१
ततोऽब्रवीत् सारथिरस्य सौम्य धातुप्रकोपप्रभवः प्रवृद्धः ।
रोगाभिधानः सुमहाननर्थः शक्तोऽपि येनैष कृतोऽस्वतन्त्रः ॥ ३, ४२
बुद्धीन्द्रियप्राणगुणैर्वियुक्तः सुप्तो विसंज्ञस्तृणकाष्ठभूतः ।
संवर्ध्य संरक्ष्य च यत्नवद्भिः प्रियप्रियैस्त्यज्यत एष कोपि ॥ ३, ५७
ततः प्रणेता वदति स्म तस्मै सर्वप्रजानामिदमन्तकर्म ।
हीनस्य मध्यस्य महात्मनो वा सर्वस्य लोके नियतो विनाशः ॥ ३, ५९
अहं जरामृत्युभयं विदित्वा मुमुक्षया धर्ममिमं प्रपन्नः ।
बन्धून् प्रियानश्रुमुखान् विहाय प्रागेव कामानशुभस्य हेतून् ॥ ११, ७
नाशीविषेभ्योऽपि तथा बिभेमि नैवाशनिभ्यो गगनाच्च्युतेभ्यः ।
न पावकेभ्योऽनिलसंहितेभ्यो यथा भयं मे विषयेभ्य एभ्यः ॥ ११, ८
कामैः सतृष्णस्य हि नास्ति तृप्तिर्यथेन्धनैर्वातसखस्य वह्नेः ॥ ११, १०
लोकस्य कामै र्न वितृप्तिरस्ति पतद्भिरम्भोभिरिवार्णवस्य ॥ ११, १२
शक्रस्य चार्धासनमप्यवाप्य मान्धातुरासीद् विषयेष्वतृप्तिः ॥ ११, १३
दर्पान् महर्षीनपि वाहयित्वा कामेष्वतृप्तो नहुषः पपात ॥ ११, १४

---

१. आचार्येणाश्वघोषेण महायानश्रद्धोत्पादशास्त्रं निरमायि । इदं तु शास्त्रं मूल-संस्कृतभाषायां नोपलभ्यत इति महद्दुःखस्य विषयोऽयम् ।

२. प्रियाऽप्रियैः इति पाठभेदः ।

चीराम्बरा मूलफलाम्बुभक्षा जटा वहन्तोऽपि भुजङ्गदीर्घाः ।
यै र्नान्यकार्या मुनयोऽपि भग्नाः कः कामसंज्ञान् मृगयेत शत्रून् ॥ ११,१७

द्वन्द्वानि सर्वस्य यतः प्रसक्तान्यलाभलाभप्रभृतीनि लोके ।
अतोऽपि नैकान्तसुखोऽस्ति कश्चिन्नैकान्तदुःखः पुरुषः पृथिव्याम् ॥ ११,४३

पदे तु यस्मिन् न जरा न भीर्न रुङ् न जन्म नैवोपरमो न चाधयः ।
तमेव मन्ये पुरुषार्थमुत्तमं न विद्यते यत्र पुनः पुनः क्रिया ॥ ११, ५६

स्वस्थप्रसन्नमनसः समाधिरुपपद्यते ।
समाधियुक्तचित्तस्य ध्यानयोगः प्रवर्तते ॥ १२, १०५

ध्यानप्रवर्तनाद्धर्माः प्राप्यन्ते यैरवाप्यते ।
दुर्लभं शान्तमजरं परं तदमृतं पदम् ॥ १२, १०६

तृतीयः परिच्छेदः

शून्यवादः

नागार्जुनः

(१)

मूलमाध्यमिककारिका

मंगलाचरणम् अनिरोधमनुत्पादमनुच्छेदमशाश्वतम् ।
अनेकार्थमनानार्थमनागममनिर्गमम् ॥
यः प्रतीत्यसमुत्पादं प्रपञ्चोपशमं शिवम् ।
देशयामास सम्बुद्धस्तं वन्दे वदतां वरम् ।

प्रत्ययपरीक्षा न स्वतो नापि परतो न द्वाभ्यां नाप्यहेतुतः ।
उत्पन्ना जातु विद्यन्ते भावाः क्वचन केचन ॥ १, १
चत्वारः प्रत्यया हेतुश्चालम्बनमनन्तरम् ।
तथैवाधिपतेयं च प्रत्ययो नास्ति पञ्चमः ॥ १, २
न हि स्वभावो भावानां प्रत्ययादिषु विद्यते ।
अविद्यमाने स्वभावे परभावो न विद्यते ॥ १, ३
क्रिया न प्रत्ययवती नाप्रत्ययवती क्रिया ।
प्रत्यया नाक्रियावन्तः क्रियावन्तश्च सन्त्युत ॥ १, ४
उत्पद्यते प्रतीत्येमानितीमे प्रत्ययाः किल ।
यावन् नोत्पद्यत इमे तावन् नाप्रत्ययाः कथम् ॥ १, ५
नैवासतो नैव सतः प्रत्ययोऽर्थस्य युज्यते ।
असतः प्रत्ययः कस्य सतश्च प्रत्ययेन किम् ॥ १, ६
न सन् नासन् न सदसद् धर्मो निर्वतते यदा ।
कथं निर्वतको हेतुरेवं सति हि युज्यते ॥ १, ७
अनालम्बन एवायं सद्धर्म उपदिश्यते ।
अथानालम्बने धर्मे कुत आलम्बनं पुनः ॥ १, ८
अनुत्पन्नेषु धर्मेषु निरोधो नोपपद्यते ।

नानन्तरमतो युक्तं निरुद्धे प्रत्ययश्च कः ॥ १, ६
भावानां निःस्वभावानां न सत्ता विद्यते यतः ।
सतीदमस्मिन् भवतीत्येतन् नैवोपपद्यते ॥ १, १०
तस्मान् न प्रत्ययमयं नाप्रत्ययमयं फलम् ।
संविद्यते, फलाभावात् प्रत्ययाप्रत्ययाः कुतः ॥ १, १४

गतागतपरीक्षा गतं न गम्यते तावदगतं नैव गम्यते ।
गतागतविनिर्मुक्तं गम्यमानं न गम्यते ॥ २, १
गन्ता न गच्छति तावदगन्ता नैव गच्छति ।
अन्यो गन्तुरगन्तुश्च कस्तृतीयो हि गच्छति ॥ २, ८
यदेव गमनं गन्ता स एव हि भवेद् यदि ।
एकीभावः प्रसज्येत कर्तुः कर्मण एव च ॥ २, १६
अन्य एव पुनर्गन्ता गतेर्यदि विकल्प्यते ।
गमनं स्यादृते गन्तुर्गन्ता स्याद् गमनादृते ॥ २, २०
गमनं सदसद्भूतस्त्रिप्रकारं न गच्छति ।
तस्माद् गतिश्च गन्ता च गन्तव्यं च न विद्यते ॥ २, २५

इन्द्रियपरीक्षा न दृष्टं दृश्यते तावददृष्टं नैव दृश्यते ।
दृष्टादृष्टविनिर्मुक्तं दृश्यमानं न दृश्यते ॥ ३, १

धातुपरीक्षा अस्तित्वं ये तु पश्यन्ति नास्तित्वं चाल्पबुद्धयः ।
भावानां, ते न पश्यन्ति द्रष्टव्योपशमं शिवम् ॥ ५, ८

संस्कृतपरीक्षा यथा माया यथा स्वप्नो गन्धर्वनगरं यथा ।
तथोत्पादस्तथा स्थानं तथा भङ्ग उदाहृतः ॥ ७, ३४

अग्नीन्धनपरीक्षा आत्मनश्च सतत्वं ये भावानां च पृथक् पृथक् ।
निर्दिशन्ति न तान् मन्ये शासनस्यार्थकोविदान् ॥ १०, १६

पूर्वापरकोटिपरीक्षा पूर्वा प्रज्ञायते कोटिर्नेत्युवाच महामुनिः ।
संसारोऽनवराग्रो हि नास्यादिर्नापि पश्चिमम् ॥ ११, १
नैवाग्रं नावरं यस्य तस्य मध्यं कुतो भवेत् ।
तस्मान् नात्रोपपद्यन्ते पूर्वापरसहक्रमाः ॥ ११, २

दुःखपरीक्षा स्वयं कृतं परकृतं द्वाभ्यां कृतमहेतुकम् ।

दुःखमित्येक इच्छन्ति तच्च कार्यं न युज्यते ॥ १२, १
न केवलं हि दुःखस्य चातुर्विध्यं न विद्यते ।
बाह्यानामपि भावानां चातुर्विध्यं न विद्यते ॥ १२, १०

संस्कारपरीक्षा तन्मृषा मोषधर्मा यद् भगवानित्यभाषत ।
सर्वे च मोषधर्माणः संस्कारास्तेन ते मृषा ॥ १३, १
कस्य स्यादन्यथाभावः स्वभावश्चेन् न विद्यते ।
कस्य स्यादन्यथाभावः स्वभावो यदि विद्यते ॥ १३, ४
तस्य चेदन्यथाभावः क्षीरमेव भवेद् दधि ।
क्षीरादन्यस्य कस्यचिद् दधिभावो भविष्यति ॥ १३, ६
यद्यशून्यं भवेत् किंचित् स्याच्छून्यमिति किंचन ।
न किंचिदस्त्यशून्यं च कुतः शून्यं भविष्यति ॥ १३, ७
शून्यता सर्वदृष्टीनां प्रोक्ता निःसरणं जिनैः ।
येषां तु शून्यतादृष्टिस्तानसाध्यान् बभाषिरे ॥ १३, ८

स्वभावपरीक्षा भावस्य चेदप्रसिद्धिरभावो नैव सिध्यति ।
भावस्य ह्यन्यथाभावमभावं ब्रुवते जनाः ॥ १५, ५
स्वभावं परभावं च भावं चाभावमेव च ।
ये पश्यन्ति न पश्यन्ति ते तत्त्वं बुद्धशासने ॥ १५, ६
अस्तीति शाश्वतग्राहो नास्तीत्युच्छेददर्शनम् ।
तस्मादस्तित्वनास्तित्वे नाश्रीयेत विचक्षणः ॥ १५, १०

बन्धनमोक्षपरीक्षा निर्वास्याम्यनुपादानो निर्वाणं मे भविष्यति ।
इति येषां ग्रहस्तेषामुपादानमहाग्रहः ॥ १६, ९
न निर्वाणसमारोपो न संसारापकर्षणम् ।
यत्र कस्तत्र संसारो निर्वाणं किं विकल्प्यते ॥ १६, १०

कर्मफलपरीक्षा कर्म स्वभावतश्चेत् स्याच्छाश्वतं स्यादसंशयम् ।
अकृतं च भवेत् कर्म क्रियते नहि शाश्वतम् ॥ १७, २१
कर्म नोत्पद्यते कस्मात् निःस्वभावं यतस्ततः ।
यस्माच्च तदनुत्पन्नं न तस्माद् विप्रणश्यति ॥ १७, २१
अकृताभ्यागमभयं स्यात् कर्माकृतकं यदि ।
अब्रह्मचर्यवासश्च दोषस्तत्र प्रसज्यते ॥ १७, २३

व्यवहारा विरुध्यन्ते सर्व एव न संशयः ।
पुण्यपापकृतो नैव प्रविभागश्च युज्यते ॥ १७, २४
कर्म क्लेशात्मकं चेदं ते च क्लेशा न तत्वतः ।
न चेत् ते तत्वतः क्लेशाः कर्म स्यात् तत्वतः कथम् ॥ १७,२६
कर्म चेन् नास्ति कर्ता च कुतः स्यात् कर्मजं फलम् ।
असत्यथ फले भोक्ता कुत एव भविष्यति ॥ १७, ३०
शून्यता च न चोच्छेदः संसारश्च न शाश्वतम् ।
कर्मणोऽविप्रणाशश्च धर्मो बुद्धेन देशितः ॥ १७, २०
क्लेशाः कर्माणि देहाश्च कर्तारश्च फलानि च ।
गन्धर्वनगराकारा मरीचिस्वप्नसन्निभाः ॥ १७, ३३
आत्मपरीक्षा ममेत्यहमिति क्षीणे बहिर्धाऽऽध्यात्ममेव च ।
निरुध्यत उपादानं तत् क्षयाज्जन्मनः क्षयः ॥ १८, ४
कर्मक्लेशक्षयान् मोक्षः कर्मक्लेशा विकल्पतः ।
ते प्रपञ्चात्, प्रपञ्चस्तु शून्यतायां निरुध्यते ॥ १८, ५
आत्मेत्यपि प्रज्ञपितमनात्मेत्यपि देशितम् ।
बुद्धैर्नात्मा न चानात्मा कश्चिदित्यपि देशितम् ॥ १८, ६
निवृत्तमभिधातव्यं निवृत्ते चित्तगोचरे ।
अनुत्पन्नाऽनिरुद्धा हि निर्वाणमिव धर्मता ॥ १८, ७
अपरप्रत्ययं शान्तं प्रपञ्चैरप्रपञ्चितम् ।
निर्विकल्पमनानार्थमेतत् तत्त्वस्य लक्षणम् ॥ १८, ९
प्रतीत्य यद् यद् भवति न हि तावत् तदेव तत् ।
न चान्यदपि तत् तस्मान् नोच्छिन्नं नापि शाश्वतत् ॥ १८,१०
अनेकार्थमनानार्थमनुच्छेदमशाश्वतम् ।
एतत् तल्लोकनाथानां बुद्धानां शासनामृतम् ॥ १८, ११
कालपरीक्षा भावं प्रतीत्य कालश्चेत् कालो भावादृते कुतः ।
न च कश्चन भावोऽस्ति कुतः कालो भविष्यति ॥ १९, ६
भवविभवपरीक्षा विना वा सह वा नास्ति विभवः संभवेन वै ।
विना वा सह वा नास्ति संभवो विभवेन वै ॥ २१, १
न स्वतो जायते भावः परतो नैव जायते ।

न स्वतः परतश्चैव जायते, जायते कुतः ॥ २१, १३
एवं त्रिष्वपि कालेषु न युक्ता भवसन्ततिः ।
त्रिषु कालेषु या नास्ति सा कथं भवसन्ततिः ॥ २१, २१

तथागतपरीक्षा शून्यमिति न वक्तव्यमशून्यमिति नो भवेत् ।
उभयं नोभयं चेति, प्रज्ञप्त्यर्थं तु कथ्यते ॥ २२, ११
शाश्वताशाश्वताद्यत्र कुतः शान्ते चतुष्टयम् ।
अन्तानन्तादि चाप्यत्र कुतः शान्ते चतुष्टयम् ॥ २२, १२
स्वभावतश्च शून्येऽस्मिंश्चिन्ता नैवोपपद्यते ।
परं निरोधाद् भवति बुद्धो न भवतीति वा ॥ २२, १४
प्रपञ्चयंति ये बुद्धं प्रपञ्चातीतमव्ययम् ।
ते प्रपञ्चहताः सर्वे न पश्यन्ति तथागतम् ॥ २२, १५
तथागतो यत्स्वभावस्तत्स्वभावमिदं जगत् ।
तथागतो निःस्वभावो निःस्वभावमिदं जगत् ॥ २२, १६

आर्यसत्यपरीक्षा यदि शून्यमिदं सर्वमुदयो नास्ति न व्ययः ।
चतुर्णामार्यसत्यानामभावस्ते प्रसज्यते ॥ २४, १
संघो नास्ति न चेत् सन्ति तेऽष्टौ पुरुषपुद्गलाः ।
अभावाच्चार्यसत्यानां सद्धर्मोऽपि न विद्यते ॥ २४, ४
धर्मे चासति संघे च कथं बुद्धो भविष्यति ।
एवं त्रीण्यपि रत्नानि ब्रुवाणः प्रतिबाधसे ॥ २४, ५
शून्यतां फलसद्भावमधर्मं धर्ममेव च ।
सर्वसंव्यवहारांश्च लौकिकान् प्रतिबाधसे ॥ २४, ६
अत्र ब्रूमः शून्यतायां न त्वं वेत्सि प्रयोजनम् ।
शून्यतां शून्यतार्थं च तत एवं विहन्यसे ॥ २४, ७
द्वे सत्ये समुपाश्रित्य बुद्धानां धर्मदेशना ।
लोकसंवृतिसत्यं च सत्यं च परमार्थतः ॥ २४, ८
येऽनयोर्न विजानन्ति विभागं सत्ययोर्द्वयोः ।
ते तत्त्वं न विजानन्ति गम्भीरं बुद्धशासने ॥ २४, ९
व्यवहारमनाश्रित्य परमार्थो न देश्यते ।
परमार्थमनागम्य निर्वाणं नाधिगम्यते ॥ २४, १०

विनाशयति दुर्दृष्टा शून्यता मन्दमेधसम् ।
सर्पो यथा दुर्गृहीतो विद्या वा दुष्प्रसाधिता ॥ २४, ११
अतश्च प्रत्युदावृत्तं चित्तं देशयितुं मुनेः ।
धर्मं, मत्वाऽस्य धर्मस्य मन्दैर्दुरवगाहताम् ॥ २४, १२
शून्यतायामधिलयं यं पुनः कुरुते भवान् ।
दोषप्रसङ्गो नास्माकं स शून्ये नोपपद्यते ॥ २४, १३
सर्वं च युज्यते तस्य शून्यता यस्य युज्यते ।
सर्वं न युज्यते तस्य शून्यं यस्य न युज्यते ॥ २४, १४
स त्वं दोषानात्मनीनानस्मासु परिपातयन् ।
अश्वमेवाभिरूढः सन्नश्वमेवासि विस्मृतः ॥ २४, १५
स्वभावाद् यदि भावानां सद्भावमनुपश्यसि ।
अहेतुप्रत्ययान् भावांस्त्वमेवं सति पश्यसि ॥ २४, १६
कार्यं च कारणं चैव कर्तारं करणं क्रियाम् ।
उत्पादं च निरोधं च फलं च प्रतिबाधसे ॥ २४, १७
यः प्रतीत्यसमुत्पादः शून्यतां तां प्रचक्ष्महे ।
सा प्रज्ञप्तिरुपादाय प्रतिपत् सैव मध्यमा ॥ २४, १८
अप्रतीत्यसमुत्पन्नो धर्मः कश्चिन् न विद्यते ।
यस्मात् तस्मादशून्यो हि धर्मः कश्चिन् न विद्यते ॥ २४, १९
यद्यशून्यमिदं सर्वमुदयो नास्ति न व्ययः ।
चतुर्णामार्यसत्यानामभावस्ते प्रसज्यते ॥ २४, २०
फलाभावे फलस्था नो न सन्ति प्रतिपन्नकाः ।
संघो नास्ति न चेत् सन्ति तेऽष्टौ पुरुषपुद्गलाः ॥ २४, २९
अभावाच्चार्यसत्यानां सद्धर्मोऽपि न विद्यते ।
धर्मे चासति संघे च कथं बुद्धो भविष्यति ॥ २४, ३०
न च धर्ममधर्मं वा कश्चिज्जातु करिष्यति ।
किमशून्यस्य कर्तव्यं स्वभावः क्रियते न हि ॥ २४, ३३
सर्वसंव्यवहारांश्च लौकिकान् प्रतिबाधसे ।
यत् प्रतीत्यसमुत्पादशून्यतां प्रतिबाधसे ॥ २४, ३६
अजातमनिरुद्धं च कूटस्थं च भविष्यति ।

विचित्राभिरवस्थाभिः स्वभावे रहितं जगत् ।। २४, ३८
यः प्रतीत्यसमुत्पादं पश्यतीदं स पश्यति ।
दुःखं समुदयं चैव निरोधं मार्गमेव च ।। २४, ४०

निर्वाणपरीक्षा यदि शून्यमिदं सर्वमुदयो नास्ति न व्ययः ।
प्रहाणाद् वा निरोधाद् वा कस्य निर्वाणमिष्यते ।। २५, १
यद्यशून्यमिदं सर्वमुदयो नास्ति न व्ययः ।
प्रहाणाद् वा निरोधाद् वा कस्य निर्वाणमिष्यते ।। २५, २
अप्रहीणमसम्प्राप्तमनुच्छिन्नमशाश्वतम् ।
अनिरुद्धमनुत्पन्नमेतन् निर्वाणमुच्यते ।। २५, ३
भावश्च यदि निर्वाणं निर्वाणं संस्कृतं भवेत् ।
नासंस्कृतो हि विद्यते भावः क्वचन कश्चन ।। २५, ५
यदि भावो न निर्वाणमभावः किं भविष्यति ।
निर्वाणं यत्र भावो न नाभावस्तत्र विद्यते ।। २५, ७
प्रहाणं चाब्रवीच्छास्ता भवस्य विभवस्य च ।
तस्मान् न भावो नाभावो निर्वाणमिति युज्यते ।। २५, १०
भवेदभावो भावश्च निर्वाणमुभयं कथम् ।
न तयोरेकत्रास्तित्वमालोकतमसोर्यथा ।। २५, १४
नैवाभावो नैव भावो निर्वाणं यदि विद्यते ।
नैवाभावो नैव भाव इति केन तदज्यते ।। २५, १६
य आजवंजवीभाव उपादाय प्रतीत्य वा ।
सोऽप्रतीत्याऽनुपादाय निर्वाणमुपदिश्यते ।। २५, ९
न संसारस्य निर्वाणात् किंचिदस्ति विशेषणम् ।
न निर्वाणस्य संसारात् किंचिदस्ति विशेषणम् ।। २५, १९
निर्वाणस्य च या कोटिः कोटिः संसरणस्य च ।
न तयोरन्तरं किंचित् सुसूक्ष्ममपि विद्यते ।। २५, २०
सर्वोपलम्भोपशमः प्रपञ्चोपशमः शिवः ।

न क्वचित् कस्यचित् कश्चिद् धर्मो बुद्धेन देशितः ॥ २५, २४

द्वादशाङ्गपरीक्षा संसारमूलान् संस्कारानविद्वान् संस्करोत्यतः ।
अविद्वान् कारकस्तस्मान् न विद्वांस्तत्त्वदर्शनात् ॥ २६, १०
अविद्यायां निरुद्धायां संस्काराणामसंभवः ।
अविद्याया निरोधस्तु ज्ञानेनास्यैव भावनात् ॥ २६, ११

दृष्टिपरीक्षा अथवा सर्वभावानां शून्यत्वाच्छाश्वतादयः ।
क्व कस्य कतमाः कस्मात् संभविष्यन्ति दृष्टयः ॥ २७, २९

सर्वदृष्टिप्रहाणाय यः सद्धर्ममदेशयत् ।
अनुकम्पामुपादाय तं नमस्यामि गौतमम् ॥ २७, ३०

(२)

विग्रहव्यावर्त्तनी

(स्वोपज्ञवृत्त्या सहिता)

पूर्वपक्षः सर्वेषां भावानां सर्वत्र न विद्यते स्वभावश्चेत् ।
त्वद्वचनमस्वभावं न निवर्तयितुमस्वभावमलम् ॥ १
अथ सस्वभावमेतद् वाक्यं श्रुत्वा हता प्रतिज्ञा ते ।
वैषमिकत्वं तस्मिन् विशेषहेतुश्च वक्तव्यः ॥ २
यदि च न भवेत् स्वभावो धर्माणां निःस्वभाव इत्येवम् ।
नामापि भवेन् नैवं, नामापि निर्वस्तुकं नास्ति ॥ ६
सत एव प्रतिषेधो, नास्ति घटो गेह इत्ययं यस्मात् ।
दृष्टः प्रतिषेधोयं सतः स्वभावस्य ते तस्मात् ॥ ११

सिद्धान्तः हेतुप्रत्ययसामग्र्यां पृथग्भावेऽपि मद्वचो न यदि ।
ननु शून्यत्वं सिद्धं, भावानामस्वभावत्वात् ॥ २१
यश्च प्रतीत्यभावो भावानां शून्यतेति सा ह्युक्ता ।
प्रतीत्य यश्च भावो भवति हि तस्यास्वभावत्वम् ॥ २२
न स्वाभाविकमेतद् वाक्यं तस्मान् न वादहानिर्मे ।
नास्ति च वैषमिकत्वं विशेषहेतुश्च न निगाद्यः ॥ २४

यदि हि वयं ब्रूमः इदं वचनमशून्यं शेषाः सर्वभावाः शून्या इति

ततो वैषमिकत्वं स्यात्। न चैतदेवम्। तस्मादस्माभिर्विशेषहेतुरपि न वक्तव्यः।

संव्यवहारं च वयं नानभ्युपगम्य कथयामः। २८

न वयं व्यवहारसत्यं प्रत्याख्याय कथयामः शून्याः सर्वभावा इति। न हि व्यवहारसत्यमनागम्य शक्या धर्मदेशना कर्तुम्।

यदि काचन प्रतिज्ञा स्यान् मे तत एव मे भवेद् दोषः।
नास्ति च मम प्रतिज्ञा तस्मान् नैवास्ति मे दोषः॥ २९

यदि किंचिदुपलभेयं प्रवर्तयेयं निवर्तयेयं वा।
प्रत्यक्षादिभिरर्थैस्तदभावान् मेऽनुपालम्भः॥ ३०

यदि च प्रमाणतस्तेषां तेषां प्रसिद्धिरर्थानाम्।
तेषां पुनः प्रसिद्धिं, ब्रूहि कथं ते प्रमाणानाम्॥ ३१

अन्यैर्यदि प्रमाणैः प्रमाणसिद्धिर्भवत्यनवस्था।
तेषामथ प्रमाणैर्विना प्रसिद्धिर्विहन्यते वादः॥ ३२, ३३

नैव स्वतः प्रसिद्धिर्न परस्परतः प्रमाणैर्वा।
भवति न च प्रमेयैर्न चाप्यकस्मात् प्रमाणानाम्॥ ५२

स यदि स्वभावतः स्याद् भावो न स्यात् प्रतीत्यसमुद्भूतः
यश्च प्रतीत्य भवति ग्राहो ननु शून्यता सैव॥ ६७

नाधर्मो धर्मो वा संव्यवहाराश्च लौकिका न स्युः।
नित्याश्च सर्वभावाः स्युर्नित्यत्वादहेतुमतः॥ ५६

प्रतिषेधयसेऽथ त्वं तच्च नास्ति शून्यत्वम्।
प्रतिषेधः सत इति ते नन्वेवं विहीयते वादः॥ ६३

प्रतिषेधयामि नाहं किंचित् प्रतिषेध्यमस्ति न च किंचित्।
तस्मात् प्रतिषेधयसीत्यधिलय एव त्वया क्रियते॥ ६४

प्रभवति च शून्यतेयं यस्य प्रभवन्ति तस्य सर्वार्थाः।
प्रभवति न तस्य किंचित् न भवति शून्यता यस्य॥ ७१

यः शून्यतां प्रतीत्यसमुत्पादं मध्यमां प्रतिपदमनेकार्थाम्।
निजगाद प्रणमामि तमप्रतिमसंबुद्धम्॥ ७२

(३)

रत्नावली

प्रथमः परिच्छेदः निवृत्तिरशुभात् कृत्स्नात् प्रवृत्तिस्तु शुभे सदा ।
मनसा कर्मणा वाचा धर्मोऽयं द्विविधः स्मृतः ॥ २२
नास्म्यहं न भविष्यामि न मेऽस्ति न भविष्यति ।
इति बालस्य संत्रासः पण्डितस्य भयक्षयः ॥
न भविष्यति निर्वाणे सर्वमेतन् न ते भयम् ।
उच्यमान इहाऽभावस्तस्य ते किं भयंकरः ॥ ४०
न चाभावोऽपि निर्वाणं कुत एवास्य भावता ।
भावाभावपरामर्शक्षयो निर्वाणमुच्यते ॥ ४२
ज्ञाने नास्त्यस्तिताशान्ते पापपुण्यव्यतिक्रमः ।
दुर्गतेः सुगतेश्चास्मात् स मोक्षः सद्भिरुच्यते ॥ ४५
नास्तिको दुर्गतिं याति सुगतिं याति चास्तिकः ।
यथाभूतपरिज्ञानान् मोक्षमद्वयनिश्रितः ॥ ५७
न प्रतिज्ञा न चरितं न चित्तं बोधिनिश्रयात् ।
अस्तिनास्तिव्यतीता ये कथं ते नास्तिकाः स्मृताः ॥ ६०
ससांख्यौलूक्यनिर्ग्रन्थपुद्गलस्कन्धवादिनम् ।
पृच्छ लोकं यदि वदत्यस्तिनास्तिव्यतिक्रमम् ॥ ६१
धर्मयौतकमित्यस्मान् नास्त्यस्तित्वव्यतिक्रमम् ।
विद्धि गम्भीरमित्युक्तं बुद्धानां शासनामृतम् ॥ ६२

द्वितीयः परिच्छेदः पक्षाद्धि प्रतिपक्षः स्यादुभयं तच्च नार्थतः ।
इति सत्यानृतातीतो लोकोऽयं परमार्थतः ॥ ५
धर्मात् कीर्तिः सुखं चैव नेह भीर्न परेत्य च ।
परलोकसुखं स्फीतं तस्माद् धर्मं सदा भज ॥ २७
यथैव वैयाकरणो मातृकामपि पाठयेत् ।
बुद्धोऽवदत् तथा धर्मं विनेयानां यथाक्षमम् ॥ ९४
केषांचिदवदद् धर्मं पापेभ्यो विनिवृत्तये ।
केषांचित् पुण्यसिद्ध्यर्थं केषांचिद् द्वयनिश्रितम् ॥ ९५

द्वयानिश्रितमेकेषां गम्भीरं भीरुभीषणम् ।
शून्यताकरुणागर्भं केषांचिद् बोधिसाधनम् ॥ ६६

आर्यदेवः

(१)

चतुःशतकम्*

अग्र्याणां मानसं दुःखमितरेषां शरीरजम् ।
दुःखद्वयेन लोकोऽयमहन्यहनि हन्यते ॥ ३३
कालो यथा यथा याति दुःखवृद्धिस्तथा तथा ।
तस्मात् कलेवरस्यास्य परवद् दृश्यते सुखम् ॥ ३५
प्रतिनासिकया तुष्टिः स्याद्धीनांगस्य कस्यचित् ।
रागोऽशुचिप्रतीकारे पुष्पादाविष्यते तथा ॥ ७३
यत्नतः क्रियते कर्म कृतं नश्यत्ययत्नतः ।
विरागोऽस्ति न ते कश्चिदेवं सत्यपि कर्मणि ॥ १६२
अस्मिन् धर्मेऽल्पपुण्यस्य सन्देहोऽपि न जायते ।
भवः सन्देहमात्रेण जायते जर्जरीकृतः ॥ १८०
लौकिकी देशना यत्र प्रवृत्तिस्तत्र वर्ण्यते ।
परमार्थकथा यत्र निवृत्तिस्तत्र वर्ण्यते ॥ १८३
न चेष्टा किल बुद्धानामस्ति काचिदकारणा ।
निःश्वासोऽपि हितायैव प्राणिनां संप्रवर्तते ॥ १०१
वारणं प्रागपुण्यस्य मध्ये वारणमात्मनः ।
सर्वस्य वारणं पश्चाद् यो जानीते स बुद्धिमान् ॥ ११०
शून्यता पुण्यकामेन वक्तव्या नैव सर्वदा ।
ननु प्रयुक्तमस्थाने जायते विषमौषधम् ॥ ११३
नान्यया भाषया म्लेच्छः शक्यो ग्राहयितुं यथा ।
न लौकिकमृते लोकः शक्यो ग्राहयितुं तथा ॥ ११४

* अत्र कानिचिद् विलुप्तानि पद्यानि म० म० पं० विधुशेखरभट्टाचार्येण भोटभाषानुवादात् संस्कृतेऽनूदितानि, कानिचिच्चापूर्णानि पद्यानि संपूरितानि ।

आदिर्न विद्यते यस्य यस्य मध्यं न विद्यते ।
विद्यते न च यस्यान्तः केनाऽव्यक्तः स दृश्यते ॥ २१७

शाश्वतस्य कुतो बाधा मोक्षो बाधां विना कुतः ।
तेनात्मा शाश्वतो यस्य तस्य मोक्षो न युज्यते ॥ २४४

यस्मात् प्रवर्तते भावस्तेनोच्छेदो न जायते ।
यस्मान् निवर्तते भावस्तेन नित्यो न जायते ॥ २५०

शीलादपि वरं स्रंसो न तु दृष्टेः कथंचन ।
शीलेन गम्यते स्वर्गो दृष्ट्या याति परं पदम् ॥ २८६

अहंकारोऽसतः श्रेयान् न तु नैरात्म्यदर्शनम् ।
अपायमेव यात्येकः शिवमेव तु नेतरः ॥ २८७

अद्वितीयं शिवद्वारं कुदृष्टीनां भयंकरम् ।
विषयः सर्वबुद्धानामिति नैरात्म्यमुच्यते ॥ २८८

अस्य धर्मस्य नाम्नोऽपि भयमुत्पद्यतेऽसतः ।
बलवान् नाम को दृष्टः परस्य न भयंकरः ॥ २८६

विवादस्य कृते धर्मो नाऽयमुक्तस्तथागतैः ।
परवादांस्तथाप्येष दहत्यग्निर्यथेन्धनम् ॥ २६०

शाक्यैरचेलकैर्विप्रैस्त्रिभिश्चित्तेन चक्षुषा ।
कर्णेन गृह्यते धर्मः सूक्ष्मस्तत् समयो मुनेः ॥ २९४

अलातचक्रनिर्माणस्वप्नमायाम्बुचन्द्रकैः ।
धूमिकान्तःप्रतिश्रुत्कामरीच्यभ्रैः समो भवः ॥ ३२५

न ह्यस्पर्शवतो नाम योगः स्पर्शवता सह ।
रूपादीनामतो योगः सर्वथापि न युज्यते ॥ ३३३

प्रतीत्य संभवो यस्य स स्वतन्त्रो न जायते ।
न स्वतन्त्रमिदं सर्वं स्वयं यस्मान्न विद्यते ॥ ३४८

उत्पादस्थितिभंगानां युगपन् नास्ति संभवः ।
क्रमशः संभवो नास्ति संभवो विद्यते कुतः ॥ ३६१

न भावाज्जायते भावो भावोऽभावान्न जायते ।
नाऽभावाज्जायतेऽभावोऽभावो भावान्न जायते ॥ ३६४

कारणव्यतिरेकेण यदा कार्यं न विद्यते ।
प्रवृत्तिश्च निवृत्तिश्च तदा नैवोपपद्यते ।। ३७५
सदसत्सदसच्चेति यस्यपक्षो न विद्यते ।
उपालम्भश्चिरेणाऽपि तस्य वक्तुं न शक्यते ।। ४००

(२)

चित्तविशुद्धिप्रकरणम्

यथैकः स्फटिकः स्वच्छः पररागेण रज्यते ।
तथैव चित्तरत्नं तु कल्पनारागरञ्जितम् ।। २७
प्रकृत्या कल्पनारागैर्विविक्तं चित्तरत्नकम् ।
आदिशुद्धमनुत्पन्नं निजरूपमनाविलम् ।। २८
कर्णाज्जलं जलेनैव कण्टकेनैव कण्टकम् ।
रागेणैव तथा रागमुद्धरन्ति मनीषिणः ।। ३७
यथैव रजको वस्त्रं मलेनैव तु निर्मलम् ।
कुर्याद् विज्ञस्तथात्मानं मलेनैव तु निर्मलम् ।। ३८
लोहपिण्डो जले क्षिप्तो मज्जत्येव तु केवलम् ।
पात्रीकृतं तदेवान्यं तारयेत् तरति स्वयम् ।। ४०
यथैव विधिवद् भुक्तं विषमप्यमृतायते ।
दुर्भुक्तं घृतपूरादि बालानां तु विषायते ।। ४५
इदमेव हि यच्चित्तं शोधितं हेतुभिः शुभैः ।
निर्विकल्पं निरालम्बं भाति प्रकृतिनिर्मलम् ।। ४६
आत्मात्मीयग्रहादेते संभवन्तीह जन्मिनाम् ।
अविद्याहेतुकः सोपि ह्यविद्या भ्रान्तिरिष्यते ।। ६६
रौप्यबुद्धिर्यथा शुक्तौ शुक्तिदृष्टे निवर्तते ।
नैरात्म्यदर्शनात् सापि निर्मूलमवसीदति ।। ६७
अविद्याकर्दमालिप्तं चित्तचिन्तामणिं पुमान् ।
प्रवृत्तः क्षालितुं विद्वान् कोऽविद्यां बृहयेत् पुनः ।। ७४
प्रज्ञोपायविधानेन कर्म निर्लिप्तमाचरेत् ।
पङ्कजातं यथा पद्मं पङ्कदोषैर्न लिप्यते ।। ११५

विधूतकल्पनाजालं प्रज्ञानिर्मलचेतसा ।
जन्मन्यत्रैव बुद्धत्वं प्राप्यते न च संशयः ॥ ८५

चन्द्रकीर्तिः

(१)

प्रसन्नपदा माध्यमिकवृत्तिः

योऽन्तद्वयावासविधूतवासः सम्बुद्धधीसागरलब्धजन्मा ।
सद्धर्मकोशस्य गभीरभावं यथानुबुद्धं कृपया जगाद ॥
यस्यासमज्ञानवचःशरौघा निघ्नन्ति निःशेषभवारिसेनाम् ।
त्रिधातुराज्यश्रियमादधाना विनेयलोकस्य सदेवकस्य ॥
नागार्जुनाय प्रणिपत्य तस्मै तत्कारिकाणां विवृतिं करिष्ये ।
उत्तानसत्प्रक्रियवाक्यनद्धां तर्कानलाऽव्याकुलितां प्रसन्नाम् ॥
यच्छास्ति वः क्लेशरिपूनशेषान् संत्रायते दुर्गतितो भवाच्च ।
तच्छासनात् त्राणगुणाच्च शास्त्रमेतद्द्वयं चान्यमतेषु नास्ति ॥

अत्र अनिरोधाद्यष्टविशेषणविशिष्टः प्रतीत्यसमुत्पादः शास्त्राभिधेयार्थः । सर्वप्रपञ्चोपशमशिवलक्षणं निर्वाणं शास्त्रस्य प्रयोजनम् । प्रतीत्यशब्दोऽत्र ल्यबन्तः प्राप्तावपेक्षायां वर्तते । समुत्पूर्वः पदिः प्रादुर्भावे वर्तते । ततश्च हेतुप्रत्ययापेक्षो भावानामुत्पादः प्रतीत्यसमुत्पादार्थः । 'अस्मिन् सतीदं भवति, ह्रस्वे दीर्घं यथा सति ।' अपरे तु ब्रुवते । इतिर्गमनं विनाशः । इतौ साधव इत्याः । प्रतिर्वीप्सार्थः । इत्येवं तद्धितान्तं इत्यशब्दं व्युत्पाद्य प्रति प्रति इत्यानां विनाशिनां समुत्पाद इति वर्णयन्ति (हीनयानानुयायिनः), न चैतदेवम् ।

हेतुप्रत्ययापेक्षं भावानामुत्पादं परिदीपयता भगवता (बुद्धेन) अहेत्वेकहेतुविषमहेतुसंभूतत्वं स्वपरोभयकृतत्वं च भावानां निषिद्धं भवति । तन्निषेधाच्च सांवृतं स्वरूपमुद्भासितं भवति । स एवेदानीं सांवृतः प्रतीत्यसमुत्पादः । स्वभावेनानुत्पन्नत्वात् आर्यज्ञानापेक्षया नास्मिन् निरोधो विद्यते । यथा च निरोधादयो न सन्ति प्रतीत्यसमुत्पादस्य तथा सकलशास्त्रेण प्रतिपादयिष्यति । यथावस्थितप्रतीत्यसमुत्पाददर्शने सति

आर्याणामभिधेयादिलक्षणस्य प्रपञ्चस्य सर्वथोपरमात् स एव प्रतीत्यसमुत्पादः प्रपञ्चोपशम इत्युच्यते। ज्ञानज्ञेयव्यवहारनिवृत्तौ जातिजरामरणादिनिरवशेषोपद्रवरहितत्वात् शिवः। (स एवेदानीं पारमार्थिकः प्रतीत्यसमुत्पादः।)

आचार्यबुद्धपालितः (प्रासंगिकमाध्यमिकमताचार्यः) त्वाह—'न स्वत उत्पद्यन्ते भावाः। तदुत्पादनवैयर्थ्यात्। अतिप्रसङ्गदोषाच्च।' इति। अत्रैके (स्वतन्त्रमाध्यमिकमताचार्याः भावविवेकाः तर्कज्वालानाम-माध्यमिकवृत्तौ) दूषणमाहुः—'तत् (बुद्धपालितमतं) अयुक्तं, हेतुदृष्टान्तानभिधानात्, परोक्त (सांख्योक्त)—दोषापरिहारात्, प्रसङ्गवाक्यत्वात् चेति।' सर्वमेतद् (भावविवेकोक्तं) दूषणमयुज्यमानं वयं पश्यामः। तत्र यदुक्तं हेतुदृष्टान्तानभिधानादिति तदयुक्तम्। यस्मात् परः स्वत उत्पत्तिमभ्युपगच्छन् विद्यमानस्य पुनरुत्पादे प्रयोजनं पृच्छ्यते। न च विद्यमानस्य पुनरुत्पत्तौ प्रयोजनं पश्यामः। अथ स्वाभ्युपगमविरोधचोदनयापि परो न निवर्तते तदापि निर्लज्जतया हेतुदृष्टान्ताभ्यामपि नैव निवर्तेत। न चोन्मत्तकेन सहास्माकं विवादः। तस्मात् प्रियानुमानतामेवात्मन आचार्यः (भावविवेकः) प्रकटयति, अस्थानेप्यनुमानं प्रवेशयन्। न च माध्यमिकस्य स्वतः स्वतन्त्रमनुमानं कर्तुं युक्तं, पक्षान्तराभ्युपगमाभावात्। यत् तावदुक्तं (भावविवेकेन) परोक्तदोषाऽपरिहाराच्चेति तदप्ययुक्तम्। कुतोऽस्माकं हेतुर्यस्य सिद्धसाधनं विरुद्धार्थता वा स्यात्? यस्य सिद्धसाधनस्य यस्याश्च विरुद्धार्थतायाः परिहारार्थं यत्नं करिष्यामः? तस्मात् परोक्तदोषाप्रसङ्गादेव तत्परिहार आचार्यबुद्धपालितेन न वर्णनीयः। यदुक्तं प्रसङ्गवाक्यत्वाच्चेति तदप्ययुक्तं, स्वप्रतिज्ञाया अभावात्।

कुतो नु खल्वविपरीताचार्यनागार्जुनमतानुसारिण आचार्यबुद्धपालितस्य सावकाशवचनाभिधायित्वं यतोऽस्य परोऽवकाशं लभेत। न हि शब्दा दाण्डपाशिका इव वक्तारमस्वतन्त्रयन्ति। किं तर्हि, सत्यां शक्तौ वक्तुर्विवक्षामनुविधीयन्ते। ततश्च परप्रतिज्ञाप्रतिषेधमात्रफलत्वात् प्रसङ्गापादनस्य नास्ति प्रसङ्गविपरीतार्थापत्तिः। अपि चात्मनस्तर्कशास्त्राति-

कौशलमात्रमाविश्चिकीर्षया अङ्गीकृतमध्यमकदर्शनस्य यत् स्वतन्त्रप्रयोग-वाक्याभिधानं तदतितरामनेकदोषसमुदायास्पदम्।

स्वतन्त्रमनुमानं ब्रुवतामयं दोषो जायते। न वयं स्वतन्त्रमनुमानं प्रयुञ्ज्महे परप्रतिज्ञानिषेधफलत्वादस्मदनुमानानाम्।

नन्वेवं सति यन् मृषा न तदस्तीति न सन्त्यकुशलानि कर्माणि। तदभावान् न सन्ति दुर्गतयः। न सन्ति कुशलानि कर्माणि। तदभावान् न सन्ति सुगतयः। सुगतिदुर्गत्यसंभवाच्च नास्ति संसार इति सर्वारंभवैयर्थ्यमेव स्यात्। उच्यते। संवृतिसत्यव्यपेक्षया लोकस्येदं सत्याभिनिवेशस्य प्रतिपक्षभावेन मृषार्थता भावानां प्रतिपाद्यतेऽस्माभिः। नैव त्वार्याः कृतकार्याः किंचिदुपलभन्ते यन् मृषाऽमृषा वा स्यादिति। अपि च येन हि सर्वधर्माणां मृषात्वं परिज्ञातं किं तस्य कर्माणि सन्ति संसारो वास्ति?

किं संवृते र्व्यवस्थानं, वक्तव्यम्। इदंप्रत्ययतामात्रेण संवृतेः सिद्धिरभ्युपगम्यते। न तु पक्षचतुष्टयाभ्युपगमेन, सस्वभाववादप्रसंगात्। तस्य चायुक्तत्वात्। इदंप्रत्ययतामात्राभ्युपगमे हि सति हेतुफलयोरन्योन्यापेक्षत्वान् नास्ति स्वाभाविकी सिद्धिरिति नास्ति सस्वभाववादः। अत एवोक्तम्—'स्वयं कृतं परकृतं द्वाभ्यां कृतमहेतुकम्। तार्किकैरिष्यते दुःखं त्वया तूक्तं प्रतीत्यजम्॥' इति। तत्रायं धर्मसंकेतो यदुत 'अस्मिन् सतीदं भवति।' अस्योत्पादादिदमुत्पद्यते। यदुत अविद्याप्रत्ययाः संस्काराः संस्कारप्रत्ययं विज्ञानमित्यादि।

अत्र केचित् परिचोदयन्ति। अनुत्पन्ना भावा इति किमयं प्रमाणजो निश्चय उताप्रमाणजः? तत्र यदि प्रमाणज इष्यते तदेदं वक्तव्यं, कति प्रमाणानि, किं लक्षणानि, किं विषयाणि, किं स्वत उत्पन्नानि किं परत उभयतोऽहेतुतो वेति? अथाप्रमाणजः, स न युक्तः। यतो वायं निश्चयो भवतोऽनुत्पन्ना भावा इति भविष्यति तत एव ममापि सर्वभावाः सन्तीति। अथ ते नास्ति निश्चयस्तदा स्वयमनिश्चितस्य परप्रत्यायनासंभवात् शास्त्रारंभवैयर्थ्यमेवेति।

उच्यते। यदि कश्चित् निश्चयो नामास्माकं स्यात्, स प्रमाणजो वा स्यादप्रमाणजो वा। न त्वस्ति। किं कारणम्? इहानिश्चयसंभवे सति स्यात् तत्प्रतिपक्षस्तदपेक्षो निश्चयः। यदा त्वनिश्चय एव तावदस्माकं

नास्ति तदा कुतस्तद्विरुद्धो निश्चयः स्यात् सम्बन्ध्यन्तरनिरपेक्षत्वात् खरविषाणस्य ह्रस्वदीर्घतावत्। तदा कस्य प्रसिद्ध्यर्थं प्रमाणानि परिकल्पयिष्यामः ? कुतो वैषां संख्या लक्षणं विषयः समुत्पत्तिर्वा भविष्यति ?

यद्येवं निश्चयो नास्ति कथं पुनरिदं निश्चितरूपं वाक्यमुपलभ्यते भवतां—'न स्वतो नापि परतो न द्वाभ्यां नाप्यहेतुतः। उत्पन्ना जातु विद्यन्ते भावाः क्वचन केचन ॥' इति। उच्यते। निश्चितमिदं वाक्यं लोकस्य स्वप्रसिद्ध्यैवोपपत्त्या नार्याणाम्। किं खलु आर्याणामुपपत्तिर्नास्ति ? केनैतदुक्तमस्ति वा नास्ति वेति। परमार्थो ह्यार्याणां तूष्णींभावः। ततः कुतस्तत्र प्रपञ्चसंभवो यदुपपत्तिरनुपपत्तिर्वा स्यात्। यदि ह्यार्या उपपत्तिं न वर्णयन्ति केन खलु इदानीं परमार्थं लोकं बोधयिष्यन्ति ? न खल्वार्या लोकसंव्यवहारेणोपपत्तिं वर्णयन्ति, किं तु लोकत एव या प्रसिद्धोपपत्तिस्तां परावबोधार्थमभ्युपेत्य तयैव लोकं बोधयन्ति।

कुतार्किकैः स (लौकिकः प्रमाणप्रमेयव्यवहारः) नाशितो विपरीतलक्षणाभिधानेन, तस्यास्माभिः सम्यग्लक्षणमुक्तमिति चेत् एतदप्ययुक्तम्। यदि हि कुतार्किकैर्विपरीतलक्षणप्रणयनं कृतं लक्ष्यवैपरीत्यं लोकस्य स्यात्। न चैतदेवमिति व्यर्थ एवायं प्रयत्नः (दिङ्नागादीनां न्यायमतखण्डनाय स्वसामान्यलक्षणव्यवस्थापनाय च)।

वस्तुतस्तु लक्ष्यं नास्ति लक्ष्यव्यतिरेकेण च लक्षणं निराश्रयं तथापि संवृतिरेवेति। परस्परापेक्षया तयोः सिद्ध्या सिद्धिं व्यवस्थापयाम्बभूवुराचार्याः। अवश्यं चैतदेवमभ्युपेयम्। अन्यथा हि संवृतिरुपपत्त्या न वियुज्येत। तदेव तत्त्वमेव स्यान् न संवृतिः। तिष्ठतु तावदेषा विपर्यासमात्रासादितात्मभावसत्ताका संवृतिर्मुमुक्षूणां मोक्षावाहककुशलमूलोपचयहेतुर्यावन् न तत्त्वाधिगम इति। भवान् (दिङ्नागः) त्वेतां संवृतिपरमार्थसत्यविभागदुर्विदग्धबुद्धितया क्वचिदुपपत्तिमवतार्यान्यायतो नाशयति। सोऽहं संवृतिसत्यव्यवस्थावैचक्षण्यात् लौकिक एव पक्षे स्थित्वा संवृत्येकदेशनिराकरणोपक्षिप्तोपपत्त्यन्तरान्तरं उपपत्त्यन्तरेण विनिवर्तयन् लोकं वृद्ध इव लोकाचारात् परिभ्रश्यमानं भवन्तमेव निवर्तयामि न तु संवृतिम्। तस्माद् यदि लौकिको व्यवहारस्तदाऽवश्यं लक्षणवत् लक्ष्येणापि भवितव्यम्। अथ परमार्थस्तदा लक्ष्याभावाल्लक्षणद्वयमपि नास्तीति

कुतः प्रमाणद्वयम्। तदेवं प्रमाणचतुष्टयाल्लोकस्यार्थाधिगमो व्यवस्थाप्यते। तानि च परस्परापेक्षया सिध्यन्ति। सत्सु प्रमाणेषु प्रमेयार्थाः। सत्सु प्रमेयेष्वर्थेषु प्रमाणानि। लौकिक एव दर्शने स्थित्वा बुद्धानां भगवतां धर्मदेशना।

न स्वत उत्पद्यन्ते भावाः। तदुत्पादवैयर्थ्यात् अतिप्रसंगदोषाच्च। विद्यमानस्य पुनरुत्पत्तौ प्रयोजनं नास्ति। अनवस्था चास्ति। परतोऽपि नोत्पद्यन्ते भावाः। सर्वतः सर्वसंभवप्रसंगात्, पराभावाच्च। द्वाभ्यामपि नोपजायन्ते भावाः। उभयपक्षाभिहितदोषप्रसंगात्, प्रत्येकमुत्पादासामर्थ्याच्च अहेतुतोऽपि नोत्पद्यन्ते, गगनोत्पलगन्धप्रसंगात्।

स चान्तोपदेशो लौकिक एव व्यवहारे स्थित्वा उत्साहनार्थं सत्वानां देशितो लौकिकज्ञानापेक्षया। वस्तुकचिन्तायां तु संसार एव नास्ति। तत् कुतोऽस्य परिक्षयः प्रदीपावस्थायां रज्जूरगपरिक्षयवत्।

इह सर्वेषामेव दृष्टिकृतानां सर्वग्राहाभिनिवेशानां यन् निःसरणमप्रवृतिः सा शून्यता। ये तु तस्यामपि शून्यतायां भावाभिनिवेशिनस्तेऽसाध्याः। यो न किंचिदपि ते पण्यं दास्यामीत्युक्तः स चेद् देहि भोस्तदेव मह्यं न किंचिन् नाम पण्यमिति ब्रूयात् स केनोपायेन शक्यः पण्याभावं ग्राहयितुम्?

न वयं नास्तिकाः। अस्तित्वनास्तित्वद्वयवादनिरासेन तु वयं निर्वाणपुरगामिनमद्वयपथं विद्योतयामः। न च कर्मकर्तृफलादिकं नास्तीति ब्रूमः। किं तर्हि? निःस्वभावमेतदिति व्यवस्थापयामः। तस्माद्द्वयवादिनां माध्यमिकानां कुतो मिथ्यादर्शनम्। माध्यमिकानामेव भावानां स्वभावानभ्युपगमात् शाश्वतोच्छेददर्शनद्वयप्रसङ्गो नास्तीति विज्ञेयम्। शून्यतैव सर्वप्रपञ्चनिवृत्तिलक्षणत्वान् निर्वाणमित्युच्यते।

अत्रैके परिचोदयन्ति नास्तिकाविशिष्टा माध्यमिका इति। नैवम्। कुतः? प्रतीत्यसमुत्पादवादिनो हि माध्यमिकाः सर्वमेवेहलोकपरलोकं निःस्वभावं वर्णयन्ति। नास्तिकास्तु ऐहिलौकिकं वस्तुजातं स्वभावत उपलभ्य पदार्थापवादं कुर्वन्ति। संवृत्या माध्यमिकैरस्तित्वेनाभ्युपगमान् न (नास्तिकैः) तुल्यता। वस्तुतस्तुल्यतेति चेत्। यद्यपि वस्तुतोऽसिद्धिस्तुल्या तथापि प्रतिपत्तृभेदादतुल्यता। यथा हि कृतचौर्यं पुरुषमेकः सम्य-

गपरिज्ञायैव तदमित्रप्रेरितस्तं मिथ्या व्याचष्टे चौर्यमनेन कृतमिति। अपरस्तु साक्षाद् दृष्ट्वा दूषयति। तत्र यद्यपि वस्तुतो नास्ति भेदस्तथापि परिज्ञातृभेदादेकस्तत्र मृषावादीत्युच्यते अपरस्तु सत्यवादीति।

सर्वप्रपञ्चोपशमः शून्यतायां प्रयोजनम्। भवांस्तु नास्तित्वं शून्यतार्थं परिकल्पयन् प्रपञ्चजालमेव संवर्धयमानो न शून्यतायां प्रयोजनं वेत्ति। प्रतीत्यसमुत्पादशब्दस्य योऽर्थः स एव शून्यताशब्दस्यार्थो न पुनरभावशब्दस्य योऽर्थः स शून्यताशब्दस्यार्थः। अभावशब्दार्थं च शून्यतार्थमित्यध्यारोप्य भवानस्मानुपालभते तस्मात् शून्यताशब्दार्थमपि न जानाति।

समन्ताद् वरणं संवृतिः। अज्ञानं हि समन्तात् सर्वपदार्थतत्त्वावच्छादनात् संवृतिरित्युच्यते। परस्परसंभवनं वा संवृतिरन्योन्यसमाश्रयेण। अथवा संवृतिः संकेतो लोकव्यवहारः। स चाभिधानाभिधेयज्ञानज्ञेयादिलक्षणः। कुतस्तत्र परमार्थे वाचां प्रवृत्तिः कुतो वा ज्ञानस्य। स हि परमार्थोऽपरप्रत्ययः शान्तः सर्वप्रपञ्चातीतः। स नोपदिश्यते नापि च ज्ञायते। किं तु लौकिकव्यवहारमनभ्युपगम्याशक्य एव परमार्थो देशयितुम्। अदेशितश्च न शक्योऽधिगन्तुम्। अनधिगम्य च परमार्थं न शक्यं निर्वाणमधिगन्तुम्। तस्मान् निर्वाणाधिगमोपायत्वादवश्यमेव यथावस्थिता संवृतिरादावेवाभ्युपेया भाजनमिव सलिलार्थिनेति।

भावरूपेणाऽभावरूपेण वा गृह्यमाणा शून्यता ग्रहीतारं विनाशयति। तदास्य मिथ्यादृष्टिरापद्यते। यस्येयं शून्यता क्षमते तस्य सर्वे लौकिकाः संव्यवहाराः युज्यन्ते। आगमनगमनभावजन्ममरणपरम्परारूपो य आजवंजवीभावः स कदाचिद् हेतुप्रत्ययसामग्रीमाश्रित्यास्तीति प्रज्ञप्यते दीर्घह्रस्ववत्। कदाचिदुत्पद्यते इति प्रज्ञप्यते प्रदीपप्रभावद् बीजांकुरवत्। प्रतीत्यसमुत्पादस्यैव यथावदविपरीतभावनातोऽविद्या प्रहीयते। प्रहीणाविद्यस्य च संस्कारादयो निरुध्यन्ते। वस्तुतस्तु निर्वाणे न कस्यचित् प्रहाणं नापि कस्यचित् निरोध इति विज्ञेयम्। ततश्च निरवशेषकल्पनाक्षयरूपमेव निर्वाणम्। तदेव शून्यता।

(२)

मध्यमकावतारः

तस्मान्न तस्य जनिरेव, कुतः परस्माद्, द्वाभ्यां न चास्ति, कथमेव भवेदहेतुः।
तस्माद्धि तस्य भवने न गुणोऽस्ति कश्चिज्जातस्य जन्म पुनरेव च नैव युक्तम्॥६,८
अन्यत् प्रतीत्य यदि नाम परोऽभविष्यज्जायेत तर्हि बहुलः शिखिनोऽन्धकारः
सर्वस्य जन्म च भवेत् खलु सर्वतश्च तुल्यं परत्वमखिलेऽजनकेऽपि यस्मात्॥
जन्मोन्मुखं न सदिदं यदि जायमानं नाशोन्मुखं सदपि नाम निरुध्यमानम्।
इष्टं तदा कथमिदं तुलया समानं कर्त्रा विना जनिरियं न च युक्तरूपा॥ ६,१६
सम्यङ्मृषादर्शनलब्धभावं रूपद्वयं बिभ्रति सर्वभावाः।
सम्यग्दृशां यो विषयः स तत्त्वं मृषादृशां संवृतिसत्यमुक्तम्॥ ६, २३
विनोपघातेन यदिन्द्रियाणां षण्णामपि ग्राह्यमवैति लोकः।
सत्यं हि तल्लोकत एव शेषं विकल्पितं लोकत एव मिथ्या॥ ६, २५
न बाधते ज्ञानमतैमिराणां यथोपलब्धं तिमिरेक्षणानाम्।
तथाऽमलज्ञानतिरस्कृतानां धियाऽस्ति बाधा न धियोऽमलायाः॥ ६, २७
मोहः स्वभावावरणाद्धि संवृतिः सत्यं तया ख्याति यदेव कृत्रिमम्।
जगाद तत् संवृतिसत्यमित्यसौ मुनिः पदार्थं कृतकंच संवृतिम्॥ ६, २८
*लोकः प्रमाणं न हि सर्वथाऽतो लोकस्य नो तत्त्वदशासु बाधा।
लोकप्रसिद्ध्या यदि लौकिकोऽर्थो बाध्येत लोकेन भवेद्धि बाधा॥ ६, ३१
*लोकः प्रमाणं यदि तत्त्वदर्शी लोकोऽत आर्येण परेण कोऽर्थः।
आर्यस्य मार्गेण किमस्ति कार्यं जडः प्रमाणं न हि युज्यतेऽपि॥ ६, ३०
एवं हि गंभीरतरान् पदार्थान् न वेत्ति यस्तं प्रति देशनेयम्।
अस्त्यालयः पुद्गल एव चास्ति स्कन्धा इमे वा खलु धातवश्च॥ ६, ४३
यथा तरंगा महतोऽम्बुराशेः समीरणप्रेरणयोद्भवन्ति।
तथाऽऽलयाख्यादपि सर्वबीजाद् विज्ञानमात्रं भवति स्वशक्तेः॥ ६, ४६
बाह्यो यथा ते विषयो न जातः स्वप्ने तथा नैव मनोऽपि जातम्।
चक्षुश्च चक्षुर्विषयश्च तज्जं चित्तं च सर्वं त्रयमप्यलीकम्॥ ६, ५१

---

* पण्डितेन अय्यस्वामिशास्त्रिणा भोटभाषानुवादात् संस्कृतेऽनूदितम्।

* पण्डितेन अय्यस्वामिशास्त्रिणा भोटभाषानुवादात् संस्कृतेऽनूदितम्।

जातस्य शक्तेर्नहि संभवोऽस्ति नाजातरूपस्य च शक्तिरस्ति।
विशेषणं नास्ति विना विशेष्यं वन्ध्यासुतस्यापि च तत्प्रसङ्गः ॥ ६, ५७
भविष्यता चेद् व्यपदेश इष्टः शक्तिं विना नास्ति हि भाविताऽस्य।
परस्परार्थाश्रयसंप्रसिद्धं न सिद्धमेवेति हि सद्भिरुक्तम् ॥ ६, ५८
*यदान्यतन्त्रं न हि किंचिदस्ति भवेच्च हेतुः खलु संवृतेः कः।
परस्य वस्तुप्रणयेन नूनं नष्टाऽखिला लोकगता व्यवस्था ॥ ६, ७८
आचार्यनागार्जुनपादमार्गाद् बहिर्गतानां न शिवेऽस्त्युपायः।
भ्रष्टा हि ते संवृतितत्त्वसत्यात् तद्भ्रंशतश्चास्ति न मोक्षसिद्धिः ॥ ६, ७९
उपायभूतं व्यवहारसत्यमुपेयभूतं परमार्थसत्यम्।
तयोर्विभागं न परैति यो वै मिथ्याविकल्पैः स कुमार्गयातः ॥ ६, ८०

शान्तिदेवः

बोधिचर्यावतारः

क्षणसम्पदियं सुदुर्लभा प्रतिलब्धा पुरुषार्थसाधनी।
यदि नात्र विचिन्त्यते हितं पुनरप्येष समागमः कुतः ॥ १, ४
भवदुःखशतानि तर्तुकामैरपि सत्वव्यसनानि हर्तुकामैः।
बहुसौख्यशतानि भोक्तुकामैर्न विमोच्यं हि सदैव बोधिचित्तम् ॥ १, ८
अशुचिप्रतिमामिमां गृहीत्वा जिनरत्नप्रतिमां करोत्यनर्घाम्।
रसजातमतीव वेधनीयं सुदृढं गृह्णत बोधिचित्तरत्नम् ॥ १, १०

यमदूतैर्गृहीतस्य कुतो बन्धुः कुतः सुहृत्।
पुण्यमेकं तदा त्राणं मया तच्च न सेवितम् ॥ २, ४२
अद्यैव शरणं यामि जगन्नाथान् महाबलान्।
जगद्रक्षार्थमुद्युक्तान् सर्वत्रासहरान् जिनान् ॥ २, ४८

न क्लेशा विषयेषु नेन्द्रियगणे नाप्यन्तराले स्थिताः
नातोऽन्यत्र कुह स्थिताः पुनरिमे मथ्नन्ति कृत्स्नं जगत्।
मायैवेयमतो विमुञ्च हृदय ! त्रासं भजस्वोद्यमम्
प्रज्ञार्थं, किमकाण्ड एव नरकेष्वात्मानमाबाधसे ॥ ४, ४७
शिक्षां रक्षितुकामेन चित्तं रक्ष्यं प्रयत्नतः।
न शिक्षा रक्षितुं शक्या चलं चित्तमरक्षता ॥ ५,१

बद्धश्चेच्चित्तमातङ्गः स्मृतिरज्ज्वा समन्ततः ।
भयमस्तंगतं सर्वं कृत्स्नं कल्याणमागतम् ॥ ५, ३
भूमिं छादयितुं सर्वां कुतश्चर्म भविष्यति ।
उपानच्चर्ममात्रेण च्छन्ना भवति मेदिनी ॥ ५, १३
बाह्या भावा मया तद्वच्छक्या वारयितुं न हि ।
स्वचित्तं वारयिष्यामि किं ममान्यैर्निवारितैः ॥ ५, १४
इमं चर्मपुटं तावत् स्वबुद्ध्यैव पृथक् कुरु ।
अस्थिपञ्जरतो मांसं प्रज्ञाशस्त्रेण मोचय ॥ ५, ६२
अस्थीन्यपि पृथक् कृत्वा पश्य मज्जानमन्ततः ।
किमत्र सारमस्तीति स्वयमेव विचारय ॥ ५, ६३
एवं ते रक्षतश्चापि मृत्युराच्छिद्य निर्दयः ।
कायं दास्यति गृध्रेभ्यस्तदा त्वं किं करिष्यसि ॥ ५, ६७
कायेनैव पठिष्यामि वाक्पाठेन तु किं भवेत् ।
चिकित्सापाठमात्रेण रोगिणः किं भविष्यति ॥ ५, १०९
स्वप्ने वर्षशतं सौख्यं भुक्त्वा यश्च विबुध्यते ।
मुहूर्तमपरो यश्च सुखी भूत्वा विबुध्यते ॥ ६, ५७
ननु निवर्तते सौख्यं द्वयोरपि विबुद्धयोः ।
सैवोपमा मृत्युकाले चिरजीव्यल्पजीविनोः ॥ ६, ५८
लब्ध्वापि च बहूँल्लाभांश्चिरं भुक्त्वा सुखान्यपि ।
रिक्तहस्तश्च नग्नश्च यास्यामि मुषितो यथा ॥ ६, ५९
यशोऽर्थं हारयन्त्यर्थमात्मानं मारयन्त्यपि ।
किमक्षराणि भक्ष्याणि मृते कस्य च तत् सुखम् ॥ ६, ९२
एवं क्षमो भजेद् वीर्यं वीर्ये बोधिर्यतः स्थिता ।
न हि वीर्यं विना पुण्यं यथा वायुं विना गतिः ॥ ७, १
मानुष्यं नावमासाद्य तर दुःखमहानदीम् ।
मूढ कालो न निद्राया इयं नौर्दुर्लभा पुनः ॥ ७, १४
कामैर्न तृप्तिः संसारे क्षुरधारामधूपमैः ।
पुण्यामृतैः कथं तृप्तिर्विपाकमधुरैः शिवैः ॥ ७, ६४ ॥
विषं रुधिरमासाद्य प्रसर्पति यथा तनौ ।

तथैव च्छिद्रमासाद्य दोषश्चित्ते प्रसर्पति ॥ ७, ६६
तच्चिन्तया मुधा याति ह्रस्वमायुर्मुहुर्मुहुः ।
अशाश्वतेन मित्रेण धर्मो भ्रश्यति शाश्वतः ॥ ८, ८
अस्यैकस्यापि कायस्य सहजा अस्थिखण्डकाः ।
पृथक् पृथग् गमिष्यन्ति किमुतान्यः प्रियो जनः ॥ ८, ३२
यदा मम परेषां च तुल्यमेव सुखं प्रियम् ।
तदात्मनः को विशेषो येनात्रैव सुखोद्यमः ॥ ८, ९५
मुच्यमानेषु सत्त्वेषु ये ते प्रामोद्यसागराः ।
तैरेव ननु पर्याप्तं मोक्षेणारसिकेन किम् ॥ ८, १०८
इमं परिकरं सर्वं प्रज्ञार्थं हि मुनिर्जगौ ।
तस्मादुत्पादयेत् प्रज्ञां दुःखनिवृत्तिकाङ्क्षया ॥ ९, १
संवृतिः परमार्थश्च सत्यद्वयमिदं मतम् ।
बुद्धेरगोचरस्तत्वं बुद्धिः संवृतिरुच्यते ॥ ९, २
तत्र लोको द्विधा दृष्टो योगी प्राकृतकस्तथा ।
तत्र प्राकृतको लोको योगिलोकेन बाध्यते ॥ ९, ३
बाध्यन्ते धीविशेषेण योगिनोऽप्युत्तरोत्तरैः ।
लोकेन भावा दृश्यन्ते कल्प्यन्ते चापि तत्वतः ।
न तु मायावदित्यत्र विवादो योगिलोकयोः ॥ ९, ५
यावत् प्रत्ययसामग्री तावन् मायापि वर्तते ।
दीर्घसन्तानमात्रेण कथं सत्वोऽस्ति सत्यतः ॥ ९, १०
शून्यतावासनाधानाद्धीयते भाववासना ।
किंचिन् नास्तीति चाभ्यासात् सापि पश्चात् प्रहीयते ॥ ९, ३३
यदा न भावो नाभावो मतेः सन्तिष्ठते पुरः ।
तदान्यगत्यभावेन निरालम्बा प्रशाम्यति ॥ ९, ३५
शासनं भिक्षुतामूलं भिक्षुतैव च दुःस्थिता ।
सावलम्बनचित्तानां निर्वाणमपि दुःस्थितम् ॥ ९, ४५
क्लेशज्ञेयावृतितमःप्रतिपक्षो हि शून्यता ।
शून्यता दुःखशमनी ततः किं जायते भयम् ॥ ९, ५५-५६

चतुर्थः परिच्छेदः

विज्ञानवादः

असङ्गः

महायानसूत्रालङ्कारः

प्रत्यक्षचक्षुषो बुद्धाः शासनस्य च रक्षकाः ।
अध्वन्यनावृतज्ञाना उपेक्षाऽतो न युज्यते ॥ १, ८
आशयस्योपदेशस्य प्रयोगस्य विरोधतः ।
उपष्टम्भस्य कालस्य यद्धीनं हीनमेव तत् ॥ १, १०
निश्रितोऽनियतोऽव्यापी सांवृतः खेदवानपि ।
बालाश्रयो मतस्तर्कस्तस्याऽतो विषयो न तत् ॥ १, १२

न सन् न चासन् न तथा न चान्यथा न जायते व्येति न चावहीयते ।
न वर्धते नापि विशुध्यते पुनर्विशुध्यते तत् परमार्थलक्षणम् ॥ ६, १
न चात्मदृष्टिः स्वयमात्मलक्षणा न चापि दुःसंस्थितता विलक्षणा ।
द्वयान् न चान्यद्, भ्रम एष उच्यते, ततश्च मोक्षो भ्रममात्रसंक्षयः ॥ ६, २
प्रतीत्यभावप्रभवे कथं जनः समक्षवृत्तिः श्रयतेऽन्यकारितम् ।
तमःप्रकारः कतमोऽयमीदृशो यतोऽविपश्यन् सदसन् निरीक्ष्यते ॥ ६, ४
न चान्तरं किंचन विद्यतेऽनयोः सदर्थवृत्त्या शमजन्मनोरिह ।
तथापि जन्मक्षयतो विधीयते शमस्य लाभः शुभकर्मकारिणाम् ॥ ६, ५
अर्थान् स विज्ञाय च जल्पमात्रान् संतिष्ठते तन्निभचित्तमात्रे ।
प्रत्यक्षतामेति च धर्मधातुस्तस्माद् वियुक्तो द्वयलक्षणेन ॥ ६, ७
नास्तीति चित्तात् परमेत्य बुद्ध्या चित्तस्य नास्तित्वमुपैति तस्मात् ।
द्वयस्य नास्तित्वमुपेत्य धीमान् संतिष्ठतेऽतद्गतिधर्मधातौ ॥ ६, ८
अकल्पनाज्ञानबलेन धीमतः समानुयातेन समन्ततः सदा ।
तदाश्रयो गह्वरदोषसंचयो, महागदेनेव विषं, निरस्यते ॥ ६, ९
ध्यानं चतुर्थं सुविशुद्धमेत्य निष्कल्पनाज्ञानपरिग्रहेण ।
येनार्यदिव्याप्रतिमैर्विहारैर्ब्राह्मैश्च नित्यं विहरत्युदारैः ॥ ७, २-३

हिताशयेनेह यथा जिनात्मजो व्यवस्थितः सर्वजगद् विपाचयन् ।
तथा न माता न पिता न बन्धवः सुतेषु बन्धुष्वपि सुव्यवस्थिताः ॥ ८,

परित्राणं हि बुद्धत्वं सर्वक्लेशगणात् सदा ।
सर्वदुश्चरितेभ्यश्च जन्ममृत्युभयादपि ॥ ६, ७
पौर्वापर्यव्यतिक्रान्ता सर्वावरणनिर्मला ।
न शुद्धा नापि चाशुद्धा तथता बुद्धता मता ॥ ६, २२
शून्यतायां विशुद्धायां नैरात्म्यान् मार्गलाभतः ।
बुद्धाः शुद्धात्मलाभित्वाद् गता आत्ममहात्मताम् ॥ ६, २३
न भावो नापि चाभावो बुद्धत्वं तेन कथ्यते ।
तस्माद् बुद्धतथाप्रश्ने ह्यव्याकृतनयो मतः ॥ ६, २४
यथा तोयैस्तृप्तिं व्रजति न महासागर इव
न वृद्धिं वा याति प्रततविशदाम्बुप्रविशनैः ।
तथा बौद्धो धातुः सततसमितैः शुद्धिविशनै-
र्न तृप्तिं वृद्धिं वा व्रजति परमाश्चर्यमिह तत् ॥ ६, ५५
स्वभावधर्मसम्भोगनिर्माणैर्भिन्नवृत्तिकः ।
धर्मधातुर्विशुद्धोऽयं बुद्धानां समुदाहृतः ॥ ९, ५६
भिन्नाश्रया भिन्नजलाश्च नद्यः स्वल्पोदकाः कृत्यपृथक्त्वकार्या ।
समुद्रविष्टाश्च भवन्ति सर्वा एकाश्रया एकमहाजलाश्च ॥ ६, ८३
भिन्नाश्रया भिन्नजलाश्च धीराः स्वल्पावबोधाः पृथगात्मकृत्याः ।
बुद्धत्वविष्टाश्च भवन्ति सर्वे एकाश्रया एकमहावबोधाः ॥ ६, ८५
तत्त्वं यत् सततं द्वयेन रहितं भ्रान्तेश्च संनिश्रयः
शक्यं नैव च सर्वथाभिलपितुं यच्चाप्रपञ्चात्मकम् ।
ज्ञेयं हेयमथो विशोध्यममलं यच्च प्रकृत्या मतं
यस्याकाशसुवर्णवारिसदृशी क्लेशाद् विशुद्धिर्मता ॥ ११, १३
विदित्वा नैरात्म्यं द्विविधमिह धीमान् भवगतं
समं तच्च ज्ञात्वा प्रविशति स तत्त्वं ग्रहणतः ।
ततस्तत्र स्थानान् मनस इह न ख्याति तदपि
तदख्यानं मुक्तिः परम उपलम्भस्य विगमः ॥ ११, ४७
धर्मो नैव च देशितो भगवता प्रत्यात्मवेद्यो यतः

आकृष्टा जनता च युक्तिविहितैर्धर्मैः स्वकीं धर्मताम् ॥ १२, २
धर्मधातुविनिर्मुक्तो यस्माद् धर्मो न विद्यते ।
तस्मात् संक्लेशनिर्देशे स संविद् धीमतां मतः ॥ १३, १२
मतं च चित्तं प्रकृतिप्रभास्वरं सदा तदागन्तुकदोषदूषितम् ।
न धर्मताचित्तमृतेऽन्यचेतसः प्रभास्वरत्वं प्रकृतौ विधीयते ॥ १३, १६
द्वयग्राहविसंयुक्तं लोकोत्तरमनुत्तरम् ।
निर्विकल्पं मलापेतं ज्ञानं स लभते पुनः ॥ १४, २८
अभावशून्यतां ज्ञात्वा तथा भावस्य शून्यताम् ।
प्रकृत्या शून्यतां ज्ञात्वा शून्यज्ञ इति कथ्यते ॥ १४, ३४
संस्कारमात्रं जगदेत्य बुद्ध्या निरात्मकं दुःखविरूढिमात्रम् ।
विहाय योऽनर्थमयात्मदृष्टिं महात्मदृष्टिं श्रयते महार्थाम् ॥ १४, ३७
भोगेषु चानभिरतिस्तीव्रा गुरुता द्वये ह्यखेदश्च ।
योगश्च निर्विकल्पः समस्तमिदमुत्तमं यानम् ॥ १६, ५
पश्यता बोधिमासन्नां सत्त्वार्थस्य च साधनम् ।
तीव्र उत्पद्यते मोदो मुदिता तेन कथ्यते ॥ २०, ३२
दौःशील्याऽऽभोगवैमल्याद् विमला भूमिरुच्यते ।
महाधर्मावभासस्य करणाच्च प्रभाकरी ॥ २०, ३३
अर्चिर्भूता यतो धर्मा बोधिपक्षाः प्रदाहकाः ।
अर्चिष्मतीति तद् योगात् सा भूमिर्द्वयदाहतः ॥ २०, ३४
सत्त्वानां परिपाकश्च स्वचित्तस्य च रक्षणा ।
धीमद्भिर्जीयते दुःखं दुर्जया तेन कथ्यते ॥ २०, ३५
अद्वयस्याभिमुख्याच्च संसारस्यापि निर्वृतेः ।
उक्ता ह्यभिमुखी भूमिः प्रज्ञापारमिताश्रयात् ॥ २०, ३६
एकायनपथाऽऽश्लेषाद् भूमिर्दूरंगमा मता ।
द्वयसंज्ञाऽविचलनादचला च निरुच्यते ॥ २०, ३७
प्रतिसंविन्मतिसाधुत्वाद् भूमिः साधुमती मता ।
धर्ममेघाऽद्वयव्याप्तेर्धर्माकाशस्य मेघवत् ॥ २०, ३८
सर्वावरणनिर्मुक्त सर्वलोकाभिभूर्मुने ।
ज्ञानेन ज्ञेयं व्याप्तं ते मुक्तचित्त नमोऽस्तु ते ॥ २०, ४६

वसुबन्धुः

(१)

अभिधर्मकोशः*

यः सर्वथा सर्वहतान्धकारः संसारपंकाज्जगदुज्जहार ।
तस्मै नमस्कृत्य यथार्थशास्त्रे शास्त्रं प्रवक्ष्याम्यभिधर्मकोशम् ॥ १, १
प्रज्ञाऽमला सानुचराऽभिधर्मस्तत्प्राप्तये यापि च यच्च शास्त्रम् ।
तस्याऽर्थतोऽस्मिन् समनुप्रवेशात् सो वाश्रयोऽस्येत्यधिर्मकोशः ॥ १, २
सास्रवाऽनास्रवा धर्माः, संस्कृता मार्गवर्जिताः ।
सास्रवा आस्रवास्तेषु यस्मात् समनुशेरते ॥ १, ४
अनास्रवा मार्गसत्यं त्रिविधं चाऽप्यसंस्कृतम् ।
आकाशं द्वौ निरोधौ च, तत्राकाशमनावृतिः ॥ १, ५
प्रतिसंख्यानिरोधो यो विसंयोगः पृथक् पृथक् ।
उत्पादाऽत्यन्तविघ्नोऽन्यो निरोधोऽप्रतिसंख्यया ॥ १, ६
ते पुनः संस्कृता धर्मा रूपादिस्कन्धपञ्चकम् ।
त एवाऽध्वा कथावस्तु सनिःसाराः सवस्तुकाः ॥ १, ७
ये सास्रवा उपादानस्कन्धास्ते सरणा अपि ।
दुःखं समुदयो लोको दृष्टिस्थानं भवश्च ते ॥ १, ८
चत्वारः प्रत्यया उक्ता हेत्वाख्यः पञ्चहेतवः । २, ६१
चित्तचैत्ता अचरमा उत्पन्नाः समनन्तराः ।
धर्मा आलम्बनं सर्वे पतिः कारणमुच्यते ॥ २, ६२
नात्मास्ति स्कन्धमात्रं तु कर्मक्लेशाभिसंस्कृतम् ।
अन्तराभवसंतत्या कुक्षिमेति प्रदीपवत् ॥ ३, १८
यथाऽऽक्षेपं क्रमाद् वृद्धः सन्तानः क्लेशाकर्मभिः ।
परलोकं पुनर्यातीत्यनादि भवचक्रकम् ॥ ३, १९
स प्रतीत्यसमुत्पादो द्वादशाङ्गस्त्रिकाण्डकः ।
पूर्वाऽपरान्तयोर्द्वे द्वे मध्येऽष्टौ परिपूरणाः ॥ ३, २२

---

* महापंडितराहुलसांकृत्यायनेन सम्पादितः सम्पूरितश्च ।

पूर्वक्लेशदशाऽविद्या, संस्काराः पूर्वकर्मणः।
सन्धिस्कन्धास्तु विज्ञानं नामरूपमतः परम्॥ ३, २१
प्राक् षडायतनोत्पादात्, यत् पूर्वं त्रिकसंगमात्।
स्पर्शः प्राक् सुखदुःखादिकारणज्ञानशक्तितः॥ ३, २२
वित्तिः प्राङ्मैथुनात्, तृष्णा भोगमैथुनरागिणः।
उपादानं तु भोगानां प्राप्तये परिधावनम्॥ ३, २३
स भविष्यद् भवफलं कुरुते कर्म तद्भवः।
प्रतिसन्धिः पुनर्जातिर्जरामरणमाविदः॥ ३, २४
क्लेशास्, त्रीणि, द्वयं कर्म, सप्त वस्तु फलं तथा।
फलहेत्वभिसंक्षेपो द्वयोर्मध्यानुमानतः॥ ३, २६
क्लेशात् क्लेशः क्रिया चैव ततो वस्तु ततः पुनः।
वस्तु क्लेशाश्च जायन्ते भवांगानामयं नयः॥ ३, २७
कर्मजं लोकवैचित्र्यं चेतना तत्कृतं च तत्।
चेतना मानसं कर्म तज्जे वाक्कायकर्मणी॥ ४, १
तदस्तिवादात् सर्वास्तिवादिनश्च चतुर्विधाः॥ ५, २५
ते भाव-लक्षणा-ऽवस्था-ऽन्यथाऽन्यथात्ववादिनः।
तृतीयः शोभनोऽध्वाऽत्र कारित्रेण व्यवस्थितः॥ ५, २५

(भदन्तधर्मत्रातो भावान्यथात्वं मन्यते। गुणस्यान्यथात्वं न तु द्रव्यस्य। यथा दधिभावं गते दुग्धे रसादिभावानामन्यथात्वेऽपि न द्रव्यस्यान्यथात्वम्। भदन्तघोषको लक्षणान्यथात्वं मन्यते। यथा पुरुष एकस्यां स्त्रियां रक्तः अन्यासु न विरक्तः। भदन्तवसुमित्रो हि अवस्थाऽन्यथात्वं स्वीकरोति। धर्मास्तां तामवस्थां प्राप्य अनागतं प्रत्युत्पन्नं [अतीतं वाऽध्वानं समुपगच्छन्ति। यथा मृद्गुलिका एकांके प्रक्षिप्ता एकमित्युच्यते, दशांके दशेति, शतांके शतमिति तथा कारित्रे व्यवस्थितो भावो वर्तमानस्ततः प्रच्युतोऽतीतः तदप्राप्तोऽनागत इति। भदन्तबुद्धदेवोऽन्यथाऽन्यथात्वं मनुते। यथा एका स्त्री माता चोच्यते दुहिता चेति।)

काश्मीरवैभाषिकनीतिसिद्धः प्रायो मयायं कथितोऽभिधर्मः। यद् दुर्गृहीतं तदिहास्मदागः सद्धर्मनीतौ मुनयः प्रमाणम्॥ ८, ४०

(२)

त्रिस्वभावनिर्देशः

कल्पितः परतन्त्रश्च परिनिष्पन्न एव च ।
त्रयः स्वभावा धीराणां गंभीरज्ञेयमिष्यते ॥ १
यत् ख्याति परतन्त्रोऽसौ यथा ख्याति स कल्पितः ।
प्रत्ययाधीनवृत्तित्वात् कल्पनामात्रभावतः ॥ २
तस्य ख्यातुर्यथाख्यानं या सदाऽविद्यमानता ।
ज्ञेयः स परिनिष्पन्नः स्वभावोऽनन्यथात्वतः ॥ ३
कल्पितः परतन्त्रश्च ज्ञेयं संक्लेशलक्षणम् ।
परिनिष्पन्न इष्टस्तु व्यवदानस्य लक्षणम् ॥ १७
चित्तमात्रोपलंभेन ज्ञेयार्थानुपलंभता ।
ज्ञेयार्थानुपलंभेन स्याच्चित्तानुपलंभता ॥ ३६ ॥
द्वयोरनुपलंभेन धर्मधातूपलंभता ।
धर्मधातूपलंभेन स्याद् विभुत्वोपलंभता ॥ ३७
उपलब्धविभुत्वश्च स्वपरार्थप्रसिद्धितः ।
प्राप्नोत्यनुत्तरां बोधिं धीमान् कायत्रयात्मिकाम् ॥ ३८

(३)

विज्ञप्तिमात्रतासिद्धिः

विंशतिका–कारिकाः स्वोपज्ञवृत्तिसहिताः

विज्ञप्तिमात्रमेवैतदसदर्थावभासनात् ।
यथा तैमिरिकस्यासत्केशचन्द्रादिदर्शनम् ॥ १

महायाने त्रैधातुकं विज्ञप्तिमात्रं व्यवस्थाप्यते । चित्तं मनो विज्ञानं विज्ञप्तिश्चेति पर्यायाः । चित्तमत्र ससंप्रयोगमभिप्रेतम् । मात्रमित्यर्थप्रतिषेधार्थम् । अत्र चोद्यते—

यदि विज्ञप्तिरनर्था नियमो देशकालयोः ।
सन्तानस्याऽनियमश्च युक्ता कृत्यक्रिया न च ॥ २

यदि विना रूपं रूपादिविज्ञप्तिरुत्पद्यते न रूपाद्यर्थात्, कस्मात् क्व-

'अथास्ति सत्त्व उपपादुक' इति उक्तं भगवता अभिप्रायवशात् चित्तसन्तत्यनुच्छेदमायत्यामभिप्रेत्य। 'नास्तीह सत्त्व आत्मा वा धर्मास्त्वेते सहेतुकाः। इति वचनात्।

तथा पुद्गलनैरात्म्यप्रवेशो ह्यन्यथा पुनः।
देशना धर्मनैरात्म्यप्रवेशः कल्पितात्मना॥ १०

ज्ञानषट्कं प्रवर्तते, न तु कश्चिदेको द्रष्टास्ति इत्येवं विदित्वा ये पुद्गलनैरात्म्यदेशनाविनेयास्ते पुद्गलनैरात्म्यं प्रविशन्ति। अन्यथेति विज्ञप्तिमात्रदेशना। तथा धर्मनैरात्म्यप्रवेशः। विज्ञप्तिमात्रमिदं रूपादिधर्मप्रतिभासमुत्पद्यते न तु रूपादिलक्षणो धर्मः कोप्यस्तीति विदित्वा। यदि तर्हि सर्वथा धर्मो नास्ति तदपि विज्ञप्तिमात्रं नास्तीति कथं तर्हि व्यवस्थाप्यते? (उच्यते) न खलु सर्वथा धर्मो नास्तीत्येवं धर्मनैरात्म्यप्रवेशो भवति। अपि तु कल्पितात्मना। यो बालैः धर्माणां स्वभावो ग्राह्यग्राहकादिः परिकल्पितस्तेन कल्पितेनात्मना तेषां नैरात्म्यं न त्वनभिलप्येनात्मना यो बुद्धानां विषय इति। एवं विज्ञप्तिमात्रस्यापि विज्ञप्त्यन्तरपरिकल्पितेनात्मना नैरात्म्यप्रवेशात् विज्ञप्तिमात्रव्यवस्थापनया सर्वधर्माणां नैरात्म्यप्रवेशो भवति, न तु तदास्तित्वापवादात्।

प्रत्यक्षबुद्धिः स्वप्नादौ यथा सा च यदा तदा।
न सोऽर्थो दृश्यते तस्य प्रत्यक्षत्वं कथं मतम्॥ १६

रूपादीनां चक्षुरादिविषयत्वमसिद्धमिति सिद्धं विज्ञप्तिमात्रम्। (अत्र पर आह) प्रमाणवशात् अस्तित्वं नास्तित्वं वा विधीयते। सर्वेषां च प्रमाणानां प्रत्यक्षप्रमाणं गरिष्ठमित्यसत्यर्थे कथमियं बुद्धिर्भवति प्रत्यक्षमिति। यदा च सा प्रत्यक्षबुद्धिर्न भवति 'इदं मे प्रत्यक्ष' मिति (यथा स्वप्नादौ) तदा न सोऽर्थो दृश्यते। मनोविज्ञानेनैव परिच्छेदात् चक्षुर्विज्ञानस्य च तदा निरुद्धत्वात्। कथं तस्य प्रत्यक्षत्वमिष्टम्। नाननुभूतं मनोविज्ञानेन स्मर्यते इत्यवश्यमर्थानुभवेन भवितव्यम्।

उक्तं यथा तदाभासा विज्ञप्तिः स्मरणं ततः।
स्वप्ने दृग्विषयाभावं नाऽप्रबुद्धोऽवगच्छति॥ १७

(उक्तमस्माभिः) यद् विनाप्यर्थेन यथार्थाभासा चक्षुर्विज्ञानादिका विज्ञप्तिरुत्पद्यते। ततो हि विज्ञप्तेः स्मृतिसंप्रयुक्ता तत्प्रतिभासैव रूपादि-

विकल्पिका मनोविज्ञप्तिरुत्पद्यते इति न स्मृत्युत्पादात् अर्थानुभवः सिध्यति। (अत्र पर आह–) यदि यथा स्वप्ने विज्ञप्तिरभूतार्थविषया तथा जाग्रतोऽपि स्यात् तथैव तदभावं लोकः स्वयमवगच्छेत्। न चैवं भवति। तस्मान् न स्वप्न इव अर्थोपलब्धिः सर्वा निरर्थिका। (अत्रोच्यते) इदमज्ञापकम्। यस्मात् स्वप्ने दृग्विषयाभावं नाप्रबुद्धोऽवगच्छति। एवं वितथविकल्पाभ्यासवासनानिद्रया प्रसुप्तो लोकः स्वप्न इवाभूतमर्थं पश्यन् अप्रबुद्धस्तदभावं यथावन् नावगच्छति। यदा तु तत्प्रतिपक्षलोकोत्तर-निर्विकल्पज्ञानलाभात् प्रबुद्धो भवति तदा तत्पृष्ठलब्धशुद्धलौकिकज्ञानस-म्मुखीभावाद् विषयाभावं यथावदवगच्छति।

विज्ञप्तिमात्रतासिद्धिः स्वशक्तिसदृशी मया।
कृतेयं सर्वथा सा तु न चिन्त्या बुद्धगोचरः॥ २२

त्रिंशिका–कारिकाः

आत्मधर्मोपचारो हि विविधो यः प्रवर्तते।
विज्ञानपरिणामेऽसौ, परिणामः स च त्रिधा॥ १
विपाको मननाख्यश्च विज्ञप्तिर्विषयस्य च।
तत्रालयाख्यं विज्ञानं विपाकः सर्वबीजकम्॥ २
तस्य व्यावृत्तिरर्हत्वे, तदाश्रित्य प्रवर्तते।
तदालम्बं मनो नाम विज्ञानं मननात्मकम्॥ ५
द्वितीयः परिणामोऽयं, तृतीयः षड्विधस्य या।
विषयस्योपलब्धिः सा कुशलाकुशलाद्वया॥ ८
विज्ञानपरिणामोऽयं विकल्पो यद् विकल्प्यते।
तेन तन्नास्ति तेनेदं सर्वं विज्ञप्तिमात्रकम्॥ १७
कर्मणो वासना ग्राहद्वयवासनया सह।
क्षीणे पूर्वविपाकेऽन्यद्विपाकं जनयन्ति तत्॥ १९
येन येन विकल्पेन यद् यद् वस्तु विकल्प्यते।
परिकल्पित एवासौ स्वभावो न स विद्यते॥ २०
परतन्त्रस्वभावस्तु विकल्पः प्रत्ययोद्भवः।
निष्पन्नस्तस्य पूर्वेण सदा रहितता तु या॥ २१

अत एव स नैवान्यो नानन्यः परतन्त्रतः।
अनित्यतादिवद् वाच्यो नादृष्टेऽस्मिन् स दृश्यते ॥ २२
त्रिविधस्य स्वभावस्य त्रिविधां निःस्वभावताम्।
सन्धाय सर्वधर्माणां देशिता निःस्वभावता ॥ २३
प्रथमो लक्षणेनैव निःस्वभावोऽपरः पुनः।
न स्वयं भाव एतस्येत्यपरा निःस्वभावता ॥ २४
धर्माणां परमार्थश्च स यतस्तथतापि सः।
सर्वकालं तथा भावात् सैव विज्ञप्तिमात्रता ॥ २५
यावद् विज्ञप्तिमात्रत्वे विज्ञानं नावतिष्ठते।
ग्राहद्वयस्यानुशयस्तावन् न विनिवर्तते ॥ २६
विज्ञप्तिमात्रमेवेदमित्यपि ह्युपलम्भतः।
स्थापयन्नग्रतः किञ्चित् तन्मात्रे नावतिष्ठते ॥ २७
अचित्तोऽनुपलम्भोऽसौ ज्ञानं लोकोत्तरं च तत्।
आश्रयस्य परावृत्तिर्द्विधा दौष्ठुल्यहानितः ॥ २९
स एवाऽनास्रवो धातुरचिन्त्यः कुशलो ध्रुवः।
सुखो विमुक्तिकायोऽसौ धर्माख्योऽयं महामुनेः ॥ ३०

स्थिरमतिः

त्रिंशिकाविज्ञप्तिभाष्यम्

पुद्गलधर्मनैरात्म्ययोरप्रतिपन्नविप्रतिपन्नानामविपरीतपुद्गलधर्मनैरात्म्यप्रतिपादनार्थं त्रिंशिकाविज्ञप्तिप्रकरणारम्भः। पुद्गलधर्मनैरात्म्यप्रतिपादनं पुनः क्लेशज्ञेयावरणप्रहाणार्थम्। तथाह्यात्मदृष्टिप्रभवा रागादयः क्लेशाः। पुद्गलनैरात्म्यावबोधश्च सत्कायदृष्टेः प्रतिपक्षत्वात् तत्प्रहाणाय प्रवर्तमानः सर्वक्लेशान् प्रजहाति। धर्मनैरात्म्यज्ञानादपि ज्ञेयावरणप्रतिपक्षत्वात् ज्ञेयावरणं प्रहीयते। क्लेशज्ञेयावरणप्रहाणमपि मोक्षसर्वज्ञत्वाधिगमार्थम्। क्लेशा हि मोक्षप्राप्तेरावरणमतस्तेषु प्रहीणेषु मोक्षोऽधिगम्यते। ज्ञेयावरणमपि सर्वस्मिन् ज्ञेये ज्ञानप्रवृत्तिप्रतिबंधभूतमक्लिष्टमज्ञानम्। तस्मिन् प्रहीणे सर्वाकारे ज्ञेयेऽसक्तमप्रतिहतं च ज्ञानं वर्तत इत्यतः सर्वज्ञत्वमधिगम्यते। विज्ञानवद् विज्ञेयमपि द्रव्यत एवेति केचिन् मन्यन्ते।

विज्ञेयवद् विज्ञानमपि संवृतित एव न परमार्थत इत्यन्ये । इत्यस्य द्विप्रकारस्याप्येकान्तवादस्य प्रतिषेधार्थं प्रकरणारम्भः ।

आत्मा धर्माश्चोपचर्यन्त इति आत्मधर्मोपचारः । आत्मा जीवो जन्तुः, स्कन्धा धातव आयतनानि धर्माः । परिणामो नाम अन्यथात्वम् । कारणक्षणनिरोधसमकालः कारणक्षणविलक्षणः कार्यस्यात्मलाभः परिणामः । तत्रात्मादिविकल्पवासनापरिपोषाद् रूपादिविकल्पवासनापरिपोषात् चालयविज्ञानात् आत्मादिनिर्भासो विकल्पो रूपादिनिर्भासश्चोत्पद्यते । तमात्मादिनिर्भासं रूपादिनिर्भासं च तस्माद् विकल्पाद् बहिर्भूतमिवोपादाय आत्माद्युपचारो रूपादिधर्मोपचारश्च अनादिकालिकः प्रवर्तते विनापि बाह्येनात्मना धर्मैश्च । यच्च यत्र नास्ति तत् तत्रोपचर्यते । यथा वाहीके गौः । एवं विज्ञानस्वरूपे बहिश्चात्मधर्माभावात् परिकल्पित एवात्मा धर्माश्च न तु परमार्थतः सन्तीति विज्ञानवद् विज्ञेयमपि द्रव्यत एवेति अयमेकान्तवादो नाभ्युपेयः । उपचारस्य च निराधारस्याऽसंभवात् अवश्यं विज्ञानपरिणामोऽस्तीत्युपगन्तव्यो यत्रात्मधर्मोपचारः प्रवर्तते । अतश्चायमुपगमो न युक्तिक्षमो विज्ञानमपि विज्ञेयवद् संवृतित एव न परमार्थत इति । संवृतितोऽप्यभावप्रसङ्गात् । न हि संवृतिर्निरुपादाना युज्यते । तस्मादयमेकान्तवादो द्विप्रकारोऽपि निर्युक्तिकत्वात् त्याज्य इत्याचार्यवचनम् ।

विनैव बाह्येनार्थेन विज्ञानं संचिताकारमुत्पद्यते । परमाणवो नैवालम्बनम् । यदि च परमाणव एव परस्परापेक्षया विज्ञानस्य विषयीभवन्ति, एवं च सति योऽयं घटकुड्याद्याकारभेदो विज्ञाने स न स्यात् परमाणूनां अतदाकारत्वात् । न च अन्यनिर्भासस्य विज्ञानस्यान्याकारो विषयो युज्यते अतिप्रसंगात् । न च परमाणवः परमार्थतः सन्ति, अर्वाङ्मध्यपरभागसद्भावात् । एवं बाह्यार्थाभावात् विज्ञानमेवार्थाकारमुत्पद्यते स्वप्नविज्ञानवदित्यभ्युपेयम् ।

सर्वसांक्लेशिककर्मबीजस्थानत्वात् आलयः । आलयः स्थानम् । अथवाऽऽलीयन्ते उपनिबध्यन्तेऽस्मिन् सर्वधर्माः कार्यभावेन । यद्वाऽऽलीयते उपनिबध्यते कारणभावेन सर्वधर्मेष्वित्यालयः । विजानातीति विज्ञानम् । सर्वधातुगतियोनिजातिषु कुशलाकुशलकर्मविपाकत्वात् विपा-

कः। सर्वधर्मबीजाश्रयत्वात् सर्वबीजकम्। सदा स्पर्श-मनस्कारा-ऽदुःखा-ऽसुखवेदना-संज्ञा-चेतनाख्यैः पञ्चभिः सर्वत्रगैर्धर्मैरन्वितम्। न हि तदेकमभिन्नमासंसारमनुवर्तते, क्षणिकत्वात्। किं तर्हि ? तच्च वर्तते स्रोतसोघवत्। स्रोतो हेतुफलयोर्नैरन्तर्येण प्रवृत्तिः। उदकसमूहस्य पूर्वापरभागाविच्छेदेन प्रवाह ओघ इत्युच्यते। यथा ह्योघस्तृणकाष्ठगोमयादीनाकर्षयन् गच्छति एवमालयविज्ञानमपि पुण्यापुण्यकर्मवासनानुगतं स्पर्शमनस्कारादीनाकर्षयत् स्रोतसा संसारमव्युपरतं प्रवर्तत इति। तस्य व्यावृत्तिरर्हत्वे। क्षयज्ञानानुत्पादज्ञानलाभात् अर्हन् इत्युच्यते। तस्यां ह्यवस्थायां आलयविज्ञानाश्रितदौष्ठुल्यनिरवशेषप्रहाणात् आलयविज्ञानं व्यावृत्तं भवति। सैव चार्हदवस्था।

संसारनिवृत्तिरपि आलयविज्ञानेऽसति न युज्यते। संसारस्य हि कर्म क्लेशाश्च कारणम्। अतस्तेषु प्रहीणेषु संसारो विनिवर्तते नान्यथा। न चालयविज्ञानमन्तरेण तत्प्रहाणं युज्यते।

येन येन विकल्पेन यद् यद् वस्तु विकल्प्यते आध्यात्मिकं बाह्यं वान्तशो यावद् बुद्धधर्मा अपि परिकल्पित एवासौ स्वभावः। न स विद्यते सत्ताभावात्। तस्मात् सर्वमिदं विकल्पमात्रमेव तदर्थस्य परिकल्पितरूपत्वात्। परिकल्पः कुशलाकुशलाव्याकृतभेदभिन्नास्त्रैधातुकाश्चित्तचैत्ता इति।

परैर्हेतुप्रत्ययैस्तन्त्र्यते इति परतन्त्रः उत्पाद्यते इत्यर्थः। स्वतोऽन्यहेतुप्रत्ययप्रतिबद्धात्मलाभः।

अविकारपरिनिष्पत्त्या परिनिष्पन्नः। तस्येति परतन्त्रस्य पूर्वेणेति। परिकल्पितेन ग्राह्यग्राहकरूपेण सर्वकालं अत्यन्तरहितता या स परिनिष्पन्नस्वभावः। यदि हि परिनिष्पन्नः परतन्त्रात् अन्यः स्यात् एवं न परिकल्पितेन परतन्त्रः शून्यः स्यात्। अथाऽनन्य एवमपि परिनिष्पन्नो न विशुद्ध्यालम्बनः स्यात् परतन्त्रवत् संक्लेशात्मकत्वात्। एवं परतन्त्रश्च न क्लेशात्मकः स्यात् परिनिष्पन्नवत्। परिनिष्पन्ने अदृष्टे तत्पृष्ठलब्धशुद्धलौकिकज्ञानगम्यत्वात् परतन्त्रो न दृश्यते। परिनिष्पन्नश्चाकाशवदेकरसं ज्ञानम्। निर्विकल्पेन ज्ञानेनाकाशसमतायां सर्वधर्मान् पश्यतीति परतन्त्रधर्माणां तथतामात्रदर्शनात्।

प्रथमः परिकल्पितः स्वभावो लक्षणेनैव निःस्वभावः। स्वरूपाभावात्

खपुष्पवत्। अपरः परतन्त्रस्वभावः न स्वयं भावः। एतस्य मायावत् परप्रत्ययेनोत्पत्तेः। अतोऽस्य उत्पत्तिनिःस्वभावता। परमं हि लोकोत्तरं ज्ञानं निरुत्तरत्वात् तस्यार्थः परमार्थः। अथ वा आकाशवत् सर्वत्रैक-रसार्थेन वैमल्याविकारार्थेन च परिनिष्पन्नः स्वभावः परमार्थ उच्यते। स सर्वधर्माणां परतन्त्रात्मकानां परमार्थः तद्धर्मतेति कृत्वा। तस्मात् परिनिष्पन्न एव स्वभावः परमार्थनिःस्वभावता। सर्वकालं तथैव भवति नान्यथेति तथतेत्युच्यते। सैव विज्ञप्तिमात्रता।

यावदद्वयलक्षणे विज्ञप्तिमात्रे योगिनश्चित्तं न प्रतिष्ठितं भवति तावद् ग्राह्यग्राहकानुशयो न प्रहीयते। यः पुनराभिमानिकः श्रुतमात्रकेण जानी-यादहं विज्ञप्तिमात्रतायां शुद्धायां स्थित इति तद्ग्रहव्युदासार्थमाह— 'विज्ञप्तिमात्रमेवेदमित्यपि ह्युपलंभतः' इति। ग्राह्याभावे ग्राहकाभावमपि प्रतिपद्यते, न केवलं ग्राह्याभावम्। एवं हि निर्विकल्पं लोकोत्तरं ज्ञान-मुत्पद्यते ग्राह्यग्राहकाभिनिवेशानुशयाः प्रहीयन्ते स्वचित्तधर्मतायां च चित्तमेवं स्थितं भवति। यथोक्तम्—

'नोपलंभं यदा धातुं स्पृशते भावनान्वयात्।
सर्वावरणनिर्मोक्षं विभुत्वं लभते तदा॥' इति।

(अयं च विज्ञप्तिमात्रधातुः) ग्राह्यार्थानुपलंभात् ग्राहकचित्ता-भावात् अचित्तः। लोके समुदाचाराभावात् अनुपलंभः। निर्वि-कल्पत्वात् लोकोत्तरं ज्ञानम्। आश्रयोऽत्र सर्वबीजकमालयविज्ञानम्। तस्याश्रयस्य परावृत्तिः क्लेशज्ञेयावरणदौष्ठुल्यहानितः। द्विधा आवरण-भेदेन सोत्तरा निरुत्तरा च। निर्दौष्ठुल्यत्वात् स तु आस्रवविगतः इत्य-नास्रवः। आर्यधर्महेतुत्वात् धातुः। अचिन्त्यस्तर्काऽगोचरत्वात् प्रत्यात्म-वेद्यत्वात्। कुशलो विशुद्धालम्बनत्वात् क्षेमत्वात् अनास्रवधर्ममयत्वात् च। ध्रुवो नित्यत्वात् अक्षयतया। सुखो नित्यत्वादेव यदनित्यं तद् दुःखं अयं च नित्यः इत्यस्मात् सुखः। क्लेशावरणप्रहाणात् विमुक्तिकायः। स एव आश्रयपरावृत्तिलक्षणो धर्माख्योऽप्युच्यते क्लेशज्ञेयावरणप्रहाणात्। महामुनेर्धर्मकाय इत्युच्यते। संसारपरित्यागात् यत् अनुपसंक्लेशत्वात् सर्वधर्मविभुत्वलाभतश्च धर्मकायः। परममौनेययोगाद् बुद्धो भगवान् महामुनिः।

पञ्चमः परिच्छेदः

स्वतन्त्रविज्ञानवादः

दिङ्नागः

प्रमाण-समुच्चयः*

प्रथमः परिच्छेदः

प्रमाणभूताय जगद्धितैषिणे प्रणम्य शास्त्रे सुगताय तायिने ।
प्रमाणसिद्ध्यै स्वकृतिप्रकीर्णनात् निबध्यते विप्रसृतं समुच्चितम् ॥ १

प्रत्यक्षमनुमानं च प्रमाणं हि द्विलक्षणम् ।
प्रत्यक्षं कल्पनापोढं नामजात्याद्यसंयुतम् ॥
नान्तरीयकार्थदर्शनं तद् विदोऽनुमानम् ।
अनुमेयेऽथ तत् तुल्ये सद्भावो नास्तिता सति ॥
परार्थानुमानं तु स्वदृष्टार्थप्रकाशकम् ।

सर्वोऽयमनुमानानुमेयभावो बुद्ध्यारूढेन धर्मधर्मिभावेन न बहिः सदसत्त्वमपेक्षते ।

(२)

आलम्बनपरीक्षा† (स्ववृत्तिसमेता)

यद्यपीन्द्रियविज्ञप्तेर्ग्राह्यांशः कारणं भवेत् ।
अतदात्मतया तस्या नाक्षवद् विषयः स तु ॥ १
यदन्तर्ज्ञेयरूपं हि बहिर्वदवभासते ।
सोऽर्थो विज्ञानरूपत्वात् तत्प्रत्ययतयापि च ॥ ६
प्रत्ययोऽव्यभिचारित्वात् सह शक्त्यर्पणात् क्रमात् ।
सहकारिवशाद् यद्धि शक्तिरूपं तदिन्द्रियम् ॥ ७

---

* ग्रन्थोऽयं संस्कृतभाषायां नोपलभ्यते । अस्य प्रथमः परिच्छेदः भोटभाषानुवादात् पण्डितरंगस्वामि अय्यंगरेण संस्कृतभाषायामनूदितः । एच्. एन्. रेन्डलमहोदयेन न्यायग्रन्थेषु उद्धृतानि दिङ्नागवचनानि एकत्र प्रकाशितानि ।

† पण्डित अय्यस्वामिशास्त्रिणा भोटभाषानुवादात् संस्कृतेऽनूदिता ।

धर्मकीर्तिः

(१)

न्यायबिन्दुः

सम्यग् ज्ञानपूर्विका सर्वपुरुषार्थसिद्धिरिति तद् व्युत्पाद्यते। द्विविधं सम्यग्ज्ञानम्। प्रत्यक्षमनुमानं च। तत्र प्रत्यक्षं कल्पनापोढमभ्रान्तम्। अभिलापसंसर्गयोग्यप्रतिभासप्रतीतिः कल्पना।

(प्रत्यक्षस्य) विषयः स्वलक्षणम्। यस्यार्थस्य संनिधानासंनिधानाभ्यां ज्ञानप्रतिभासभेदस्तत् स्वलक्षणम्। तदेव परमार्थसत्। अर्थक्रियासामर्थ्यलक्षणत्वाद् वस्तुनः। अन्यत् सामान्यलक्षणम्। तदनुमानस्य विषयः।

अनुमानं द्विधा। स्वार्थं परार्थं च। तत्र स्वार्थं त्रिरूपात् लिंगात् यदनुमेये ज्ञानं तदनुमानम्। त्रैरूप्यं पुनर्लिङ्गस्यानुमेये सत्वमेव, सपक्षे सत्वं, विपक्षे चासत्वम्। त्रिरूपलिंगाख्यानं परार्थानुमानम्।

(२)

प्रमाणवार्तिकम्

विधूतकल्पनाजालगम्भीरोदारमूर्तये।
नमः समन्तभद्राय समन्तस्फुरणत्विषे॥ १, १
संसृज्यन्ते न भिद्यन्ते स्वतोऽर्थाः पारमार्थिकाः।
रूपमेकमनेकं च तेषु बुद्धेरुपप्लवः॥ १, ८८
शब्दाः संकेतितं प्राहु र्व्यवहाराय स स्मृतः।
तदा स्वलक्षणं नास्ति संकेतस्तेन तत्र न॥ १, ९३
शब्दाश्च बुद्धयश्चैव वस्तुन्येषामसंभवात्।
एकत्वाद् वस्तुरूपस्य भिन्नरूपा मतिः कुतः॥ १, १३६
स पारमार्थिको भावो य एवार्थक्रियाक्षमः॥ १, १६७
सर्वासां दोषजातीनां जातिः सत्कायदर्शनात्।
साऽविद्या तत्र तत्स्नेहस्तस्माद् द्वेषादिसम्भवः॥ १, २२४
अपौरुषेयतापीष्टा कर्तृणामस्मृतेः किल।

सन्त्यस्याप्यनुवक्तार इति धिग् व्यापकं तमः ॥ १, २४१
यस्य प्रमाणसम्वादि वचनं तत्कृतं वचः ।
स आगम इति प्राप्तं निरर्थाऽपौरुषेयता ॥ १, ३१७
हेयोपादेयतत्त्वस्य साभ्युपायस्य वेदकः ।
यः प्रमाणमसाविष्टो न तु सर्वस्य वेदकः ॥ २, ३३
दूरं पश्यतु वा मा वा तत्त्वमिष्टन्तु पश्यतु ।
प्रमाणं दूरदर्शी चेदेहि गृध्रानुपास्महे ॥ २, ३३
अनित्यत्वेन योऽवाच्यः स हेतुर्न हि कस्यचित् ।
नित्यं तमाहुर्विद्वांसो यत्स्वभावो न नश्यति ॥ २, २०४
अर्थक्रियासमर्थं यद् तदत्र परमार्थसत् ।
अन्यत् संवृतिसत् प्रोक्तं ते स्वसामान्यलक्षणे ॥ ३, ३
इदं वस्तुबलायातं यद् वदन्ति विपश्चितः ।
यथा यथार्थाश्चिन्त्यन्ते विशीर्यन्ते तथा तथा ॥ ३, २०९
हेतुभावादृते नान्या ग्राह्यता नाम काचन ।
तत्र बुद्धिर्यदाकारा तस्यास्तद् ग्राह्यमुच्यते ॥ ३, २२४
न ग्राह्यग्राहकाकारबाह्यमस्ति च लक्षणम् ।
अतो लक्षणशून्यत्वान् निःस्वभावाः प्रकाशिताः ॥ ३, २१५
तत्रैकस्याप्यभावे च द्वयमप्यवहीयते ।
तस्मात् तदेव तस्यापि तत्त्वं या द्वयशून्यता ॥ ३, २१३
तदुपेक्षिततत्त्वार्थैः कृत्वा गजनिमीलनम् ।
केवलं लोकबुद्ध्यैव बाह्यचिन्ता प्रतन्यते ॥ ३, २१९
प्रागुक्तं योगिनां ज्ञानं तेषां तद्भावनामयम् ।
विधूतकल्पनाजालं स्पष्टमेवावभासते ॥ ३, २८१
अविभागोऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः ।
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते ॥ ३, ३५४
मंत्राद्युपप्लुताक्षाणां यथा मृच्छकलादयः ।
अन्यथैवावभासन्ते तद्रूपरहिता अपि ॥ ३, ३५५
केनेयं सर्वचिन्तासु शास्त्रं ग्राह्यमिति स्थितिः ।
कृतेदानीमसिद्धान्तैर्ग्राह्यो धूमेन नानलः ॥ ४, ५३

अनध्यवसितावगाहनमनल्पधीशक्तिना-
प्यदृष्टपरमार्थसारमधिकाभियोगैरपि ।
मतं मम जगत्यलब्धसदृशप्रतिग्राहकं
प्रयास्यति पयोनिधेः पय इव स्वदेहे जराम् ॥ ४, २८६

शान्तरक्षितः

तत्त्वसङ्ग्रहः

प्रकृतीशोभयात्मादिव्यापाररहितं चलम् ।
कर्म तत्फलसम्बन्धव्यवस्थादिसमाश्रयम् ॥ १
गुणद्रव्यक्रियाजातिसमवायाद्युपाधिभिः ।
शून्यमारोपिताकारशब्दप्रत्ययगोचरम् ॥ २
स्पष्टलक्षणसंयुक्तप्रमाद्वितयनिश्चितम् ।
अणीयसापि नांशेन मिश्रीभूतापरात्मकम् ॥ ३
असंक्रान्तिमनाद्यन्तं प्रतिबिम्बादिसन्निभम् ।
सर्वप्रपञ्चसन्दोहनिर्मुक्तमगतं परैः ॥ ४
स्वतन्त्रः श्रुतिनिःसंगो जगद्धितविधित्सया ।
अनल्पकल्पासंख्येयसात्मीभूतमहादयः ॥ ५
यः प्रतीत्यसमुत्पादं जगाद गदतां वरः ।
तं सर्वज्ञं प्रणम्यायं क्रियते तत्त्वसंग्रहः ॥ ६
प्रकृतिपरीक्षा अशेषशक्तिप्रचितात् प्रधानादेव केवलात् ।
कार्यभेदाः प्रवर्तन्ते तद्रूपा एव भावतः ॥ ७
यदि दध्यादयः सन्ति दुग्धाद्यात्मसु सर्वथा ।
तेषां सतां किमुत्पाद्यं हेत्वादिसदृशात्मनाम् ॥ १७
अथास्त्यतिशयः कश्चिदभिव्यक्त्यादिलक्षणः ।
यं हेतवः प्रकुर्वाणा न यान्ति वचनीयताम् ॥ १६
प्रागासीद्यद्यसावेवं न किंचिद् दत्तमुत्तरम् ।
नो चेत् सोऽसत् कथं तेभ्यः प्रादुर्भावं समश्नुते ॥ २०
अव्यक्तो व्यक्तिभाक् तेभ्य इति चेद् व्यक्तिरस्य का ।
न रूपातिशयोत्पत्तिरविभागादसंगतेः ॥ २६

उत्पादो वस्तुभावस्तु सोऽसता न सता तथा ।
सम्बध्यते कल्पिकया केवलं त्वसता धिया ॥ ३२
सिद्धेपि त्रिगुणे व्यक्ते न प्रधानं प्रसिध्यति ।
एकं तत्कारणं नित्यं नैकजात्यन्वितं हि तत् ॥ ४१
प्रधानहेत्वभावेऽपि ततः सर्वं प्रकल्पते ।
शक्ते र्भेदेन वैचित्र्यं कार्यकारणतादिकम् ॥ ४५

ईश्वरपरीक्षा सर्वोत्पत्तिमतामीशमन्ये हेतुं प्रचक्षते ।
नाचेतनं स्वकार्याणि किल प्रारभते स्वयम् ॥ ४६
किन्तु नित्यैकसर्वज्ञनित्यबुद्धिसमाश्रयः ।
साध्यवैकल्यतोऽव्याप्ते र्न सिद्धिमुपगच्छति ॥ ७२
बुद्धिमत्पूर्वकत्वं च सामान्येन यदीष्यते ।
तत्र नैव विवादो नो वैश्वरूप्यं हि कर्मजम् ॥ ८०
नेश्वरो जन्मिनां हेतुरुत्पत्तिविकलत्वतः ।
गगनाम्भोजवत् सर्वमन्यथा युगपद् भवेत् ॥ ८७

ब्रह्मपरीक्षा अथाविभागमेवेदं ब्रह्मतत्त्वं सदा स्थितम् ।
अविद्योपप्लवाल्लोको विचित्रं त्वभिमन्यते ॥ १४४
न तत् प्रत्यक्षतः सिद्धमविभागमभासनात् ।
नित्यादुत्पत्त्ययोगेन कार्यलिङ्गं च तत्र न ॥ १४७
ज्ञानं ज्ञेयक्रमात् सिद्धं क्रमवत् सर्वमन्यथा ।
यौगपद्येन तत् कार्यं विज्ञानमनुषज्यते ॥ १४६
ज्ञानमात्रेऽपि नैवास्य शक्यरूपं ततः परम् ।
भवतीति प्रसक्ताऽस्य वन्ध्यासूनुसमानता ॥ १५०

पुरुषपरीक्षा अन्ये त्वीशसधर्माणं पुरुषं लोककारणम् ।
कल्पयन्ति दुराख्यातसिद्धान्तानुगबुद्धयः ॥ १५३
समस्तवस्तुप्रलयेऽप्यलुप्तज्ञानशक्तिमान् ।
ऊर्णनाभ इवांशूनां स हेतुः किल जन्मिनाम् ॥ १५४
अस्यापीश्वरवत् सर्वं वचनीयं निषेधनम् ।
किमर्थं च करोत्येष व्यापारमिममीदृशम् ॥ १५५

यद्यन्येन प्रयुक्तत्वान् न स्यादस्य स्वतन्त्रता ।
अथानुकम्पया, कुर्यादेकान्तसुखितं जगत् ॥ १५६
आधिदारिद्र्यशोकादिविविधायासपीडितम् ।
जनं तु सृजतस्तस्य काऽनुकम्पा प्रतीयते ॥ १५७
सृष्टेः प्रागनुकम्प्यानामसत्वे नोपपद्यते ।
अनुकम्पापि यद् योगाद् धातायं परिकल्पते ॥ १५८
क्रीडार्था तस्य वृत्तिश्चेत् क्रीडायां न प्रभुर्भवेत् ।
विचित्रक्रीडनोपायव्यपेक्षातः शिशुर्यथा ॥ १६१
अथ स्वभावतो वृत्तिः सर्गादावस्य वर्ण्यते ।
पावकादेः प्रकृत्यैव यथा दाहादिकर्मणि ॥ १६४
यद्येवमखिला भावा भवेयुर्युगपत् ततः ।
तदुत्पादनसामर्थ्ययोगिकारणसन्निधेः ॥ १६५
प्रकृत्यैवांशुहेतुत्वमूर्णनाभेऽपि नेष्यते ।
प्राणिभक्षणलाम्पट्याल् लालाजालं करोति यत् ॥ १६८
यथा कथंचिद् वृत्तिश्चेद् बुद्धिमत्ताऽस्य कीदृशी ।
नासमीक्ष्य यतः कार्यं शनकोऽपि प्रवर्तते ॥ १६९
शौर्यात्मजादयो येऽपि धातारः परिकल्पिताः ।
एतेनैव प्रकारेण निरस्तास्तेऽपि वस्तुतः ॥ १७०

आत्मपरीक्षा अन्ये पुनरिहात्मानमिच्छादीनां समाश्रयम् ।

(क) न्यायमतनिरासः स्वतोऽचिद्रूपमिच्छन्ति नित्यं सर्वगतं तथा ॥ १७१
ज्ञानयत्नादिसम्बन्धः कर्तृत्वं तस्य भण्यते ।
सुखदुःखादिसम्वित्तिसमवायस्तु भोक्तृता ॥ १७२
क्वचित् समाश्रितत्वं च यदीच्छादेः प्रसाध्यते ।
तथापि गतिशून्यस्य निष्फलाऽऽधारकल्पना ॥ १८१-१८२
अहंकाराश्रयत्वेन चित्तमात्मेति गीयते ।
संवृत्या, वस्तुवृत्या तु विषयोऽस्य न विद्यते ॥ २०४
अन्यैः प्रत्यक्षसिद्धत्वमात्मनः परिकल्पितम् ।
न हि नित्यविभुत्वादिनिर्भासस्तत्र लक्ष्यते ॥ २१२-२१३

तस्मादिच्छादयः सर्वे नैवात्मसमवायिनः ।
क्रमेणोत्पद्यमानत्वाद् बीजाकुंरलतादिवत् ।। २१७

(ख) मीमांसामतनिरासः व्यावृत्त्यनुगमात्मानमात्मानमपरे पुनः ।
चैतन्यरूपमिच्छन्ति चैतन्यं बुद्धिलक्षणम् ।। २२२
तदत्र चिन्त्यते नित्यमेकं चैतन्यमिष्यते ।
यदि, बुद्धिरपि प्राप्ता तद्रूपैव तथा सति ।। २४१
सर्वार्थबोधरूपा च यदि बुद्धिः सदा स्थिता ।
सर्वदा सर्वसंवित्तिस्तत् किमर्थं न विद्यते ।। २५३
यदि कर्तृत्वभोक्तृत्वे नैवावस्थां समाश्रिते ।
तदवस्थावतस्तत्वान् न कर्तृत्वादिसंभवः ।। २७२
तन्नित्यशब्दवाच्यत्वमात्मनो विनिवार्यते ।
स्वरूपविक्रियावत्त्वाद् व्युच्छेदस्तस्य विद्यते ।। २७३
सर्पोऽपि क्षणभंगित्वात् कौटिल्यादीन् प्रपद्यते ।
स्थिररूपे तु पुंसीव नावस्थान्तरसंगतिः ।। २७४
निरालम्बन एवायमहंकारः प्रवर्तते ।
अनादिसत्त्वदृग्बीजप्रभावात् क्वचिदेव हि ।। २७५

(ग) सांख्यमतनिरासः चैतन्यमन्ये मन्यन्ते भिन्नं बुद्धिस्वरूपतः ।
आत्मनश्च निजं रूपं चैतन्यं कल्पयन्ति ते ।। २८५
प्रधानेनोपनीतं च फलं भुङ्क्ते स केवलम् ।
कर्तृत्वं नैव तस्यास्ति प्रकृतेरेव तन्मतम् ।। २८६
एकरूपे च चैतन्ये सर्वकालमवस्थिते ।
नानाविधार्थभोक्तृत्वं कथं नामोपपद्यते ।। २८८
शुभाशुभं च कर्मास्ति नैव चेदात्मना कृतम् ।
तदेष भोगभेदोऽस्य कुतः समुपजायते ।। २९१
अभिलाषानुरूपेण प्रकृतिश्चेत् प्रयच्छति ।
पङ्ग्वन्धवद्धि सम्बन्धस्तयोरेष व्यवस्थितः ।। २९२
अर्थोपभोगकाले च यदि नैवास्य विक्रिया ।
नैव भोक्तृत्वमस्य स्यात् प्रकृतिर्नोपकारिणी ।। २६४

विक्रियायाश्च सद्भावे नित्यत्वमवहीयते ।
अन्यथात्वं विकारो हि तादवस्थ्ये च तत् कथम् ॥ २९५
प्रतिबिम्बोदयद्वारा चैवमस्योपभोक्तृता ।
न जहाति स्वरूपं तु पुरुषोऽयं कदाचन ॥ २९७
उच्यते प्रतिबिम्बस्य तादात्म्येन समुद्भवे ।
तदेकोदययोगित्वं विभेदे तु न भोक्तृता ॥ २९८
चैतन्ये चात्मशब्दस्य निवेशोऽपि न नः क्षतिः ।
नित्यत्वं तस्य दुःसाध्यमत्यादेः सफलत्वतः ॥ ३०५
कर्तुं नाम प्रजानाति प्रधानं व्यञ्जनादिकम् ।
भोक्तुं च न विजानाति किमयुक्तमतः परम् ॥ ३००

(घ) जैनमतनिरासः जैमिनीया इव प्राहुर्जैनाश्चिल्लक्षणं नरम् ।
द्रव्यपर्यायरूपेण व्यावृत्त्यनुगमात्मकम् ॥ ३११
अगौणे चैवमेकत्वे द्रव्यपर्याययोः स्थिते ।
व्यावृत्तिमद् भवेद् द्रव्यं पर्यायाणां स्वरूपवत् ॥ ३१७
यदि वा तेऽपि पर्यायाः सर्वेऽप्यनुगमात्मकाः ।
द्रव्यवत् प्राप्नुवन्त्येषां द्रव्येणैकात्मता स्थितेः ॥ ३१८
ततो निरन्वयो ध्वंसः स्थिरं वा सर्वमिष्यताम् ।
एकात्मनि तु नैव स्तो व्यावृत्त्यनुगमाविमौ ॥ ३२१

(ङ) औपनिषदमतनिरासः नित्यज्ञानविवर्तोऽयं क्षितितेजोजलादिकः ।
आत्मा तदात्मकश्चेति संगिरन्तेऽपरे पुनः ॥ ३२८
ग्राह्यलक्षणसंयुक्तं न किंचिदिह विद्यते ।
विज्ञानपरिणामोऽयं तस्मात् सर्वः समीक्ष्यते ॥ ३२९
तेषामल्पापराधं तु दर्शनं नित्यतोक्तितः ।
रूपशब्दादिविज्ञाने व्यक्तं भेदोपलक्षणात् ॥ ३३०
विपर्यस्ताविपर्यस्तज्ञानभेदो न विद्यते ।
एकज्ञानात्मके पुंसि बन्धमोक्षौ ततः कथम् ॥ ३३३
तत्त्वज्ञानं न चोत्पाद्यं तादात्म्यात् सर्वदा स्थितेः ।
योगाभ्यासोऽपि तेनायमफलः सर्व एव च ॥ ३३५

(च) वात्सीपुत्रीयमतनिरासः केचित् तु सौगतंमन्या अप्यात्मानं प्रचक्षते ।
पुद्गलव्यपदेशेन तत्त्वान्यत्वादिवर्जितम् ॥ ३३६
ते वाच्याः पुद्गलो नैव विद्यते पारमार्थिकः ।
तत्त्वान्यत्वादवाच्यत्वान् नभःकोकनदादिवत् ॥ ३३८
अन्यत्वं वाप्यनन्यत्वं वस्तु नैवातिवर्तते ।
वस्तुनो यत्तु नीरूपं तदवाच्यं प्रकल्प्यते ॥ ३३९
अर्थक्रियासु शक्तिश्च विद्यमानत्वलक्षणम् ।
क्षणिकेष्वेव नियता तथाऽवाच्ये न वस्तुता ॥ ३४०
आगमार्थविरोधे तु पराक्रान्तं महात्मभिः ।
नास्तिक्यप्रतिषेधाय चित्रा वाचो दयावतः ॥ ३४८
स्थिरभावपरीक्षा सर्वत्रैवानपेक्षाश्च विनाशे जन्मिनोऽखिलाः ।
सर्वथा नाशहेतूनां तत्राऽकिंचित्करत्वतः ॥ ३५७
यो हि भावः क्षणस्थायी विनाश इति गीयते । ३७५
अतो विनाशसद्भावान् न नित्याः सर्वसंस्कृताः ॥ ३७७
वस्त्वनन्तरभावित्वं न तत्र त्वस्ति तादृशि ।
चलभावस्वरूपस्य भावेनैव सहोदयात् ॥ ३७६
उत्पादानन्तराऽस्थायि स्वरूपं यच्च वस्तुनः ।
तदुच्यते क्षणः सोऽस्ति यस्य तत् क्षणिकं मतम् ॥ ३८८
असत्यप्यर्थभेदे च सोऽस्यास्येति न बाध्यते ।
इच्छारचितसंकेतमात्रभावि हि वाचकम् ॥ ३८९
अथापि सन्ति नित्यस्य क्रमिणः सहकारिणः ।
यानपेक्ष्य करोत्येष कार्यग्रामं क्रमाश्रयम् ॥ ३९६
साध्वेतत् किन्तु ते तस्य भवन्ति सहकारिणः ।
किं योग्यरूपहेतुत्वादेकार्थकरणेन वा ॥ ३९७
योग्यरूपस्य हेतुत्वे स भावस्तैः कृतो भवेत् ।
स चाशक्यक्रियो यस्मात् तत् स्वरूपं सदा स्थितम् ॥ ३९८
कृतौ वा तत्स्वरूपस्य नित्यताऽस्यावहीयते ।
विभिन्नोऽतिशयस्तस्माद्यद्यसौ कारकः कथम् ॥ ३९९
तस्मिन् सति हि कार्याणामुत्पादस्तदभावतः ।

अनुत्पादात् स एवैवं हेतुत्वेन व्यवस्थितः ॥ ४००
अथापि तेन सम्बन्धात् तस्याप्यस्त्येव हेतुता ।
कः सम्बन्धस्तयोरिष्टस्तादात्म्यं न विभेदतः ॥ ४०१

न च तस्य तदुत्पत्तिर्यौगपद्यप्रसङ्गतः ।
ततश्च यौगपद्येन कार्याणामुदयो भवेत् ॥ ४०२
तत्राप्यन्यव्यपेक्षायामनवस्था प्रसज्यते ।
एकदापि ततः कार्यं नासम्बन्धात् प्रकल्प्यते ॥ ४०३

कर्मफलसम्बन्धपरीक्षा कर्म तत्फलयोरेवमेककर्त्रऽपरिग्रहात् ।
कृतनाशाऽकृतप्राप्तिरासक्ताऽतिविरोधिनी ॥ ४७६

यथा हि नियता शक्तिर्बीजादेरङ्कुरादिषु ।
अन्वयात्मवियोगेऽपि तथैवाध्यात्मिके स्थितिः ॥ ५०२
पारम्पर्येण साक्षाद् वा क्वचित् किंचिद्धि शक्तिमत् ।
ततः कर्मफलादीनां सम्बन्ध उपपद्यते ॥ ५०३

कर्तृत्वादि व्यवस्था तु सन्तानैक्यविवक्षया ।
कल्पनारोपितैर्वेष्टा नाङ्गं सा तत्त्वसंस्थितेः ॥ ५०४

तस्मादनष्टात् तद्धेतोः प्रथमक्षणभाविनः ।
कार्यमुत्पद्यते शक्ताद् द्वितीयक्षण एव तु ॥ ५१२
विनष्टात् तु भवेत् कार्यं तृतीयादिक्षणे यदि ।
यौगपद्यप्रसङ्गोऽपि प्रथमे यदि तद् भवेत् ॥ ५१४
य आनन्तर्यनियमः सैवापेक्षाभिधीयते ।
सत्तैव व्यापृतिस्तस्यां सत्यां कार्योदयो यतः ॥ ५२०-५२१

अहीनसत्त्वदृष्टीनां क्षणभेदविकल्पना ।
सन्तानैक्याभिमानेन न कथंचित् प्रवर्तते ॥ ५४१
अभिसम्बुद्धतत्त्वास्तु प्रतिक्षणविनाशिनाम् ।
हेतूनां नियमं बुद्ध्वा प्रारभन्ते शुभाः क्रियाः ॥ ५४२

कार्यकारणभूताश्च तत्राऽविद्यादयो मताः ।
बन्धस्तद्विगमादिष्टा मुक्तिर्निर्मलता धियः ॥ ५४४

द्रव्यपरीक्षा तत्र नित्यागुरूपाणामसत्त्वमुपपादितम् ।
निःशेषवस्तुविषयक्षणभङ्गप्रसाधनात् ॥ ५५१
तदारब्धस्त्ववयवी गुणावयवभेदवान् ।
नैवोपलभ्यते तेन न सिध्यत्यप्रमाणकः ॥ ५५८

गुणपरीक्षा द्रव्याणां प्रतिषेधेन सर्व एव तदाश्रिताः ।
गुणकर्मादयोऽपास्ता भवन्त्येव तथा मताः ॥ ६३४

कर्मपरीक्षा क्षणक्षयिषु भावेषु कर्मोत्क्षेपाद्यसंभवि ।
जातदेशे च्युतेरेव तदन्यप्राप्त्यसंभवात् ॥ ६९२
देशान्तरोपलब्धेस्तु नैरन्तर्येण जन्मनः ।
समानापरवस्तूनां गतिभ्रान्तिः प्रदीपवत् ॥ ७०७

सामान्यपरीक्षा द्रव्यादिषु निषिद्धेषु जातयोऽपि निराकृताः ।
पदार्थत्रयवृत्ता हि सर्वास्ताः परिकल्पिताः ॥ ७०८
वाहदोहादिरूपेण कार्यभेदोपयोगिनि ।
गवादिश्रुतिसंकेतः क्रियते व्यवहर्तृभिः ॥ ७२८
नाभिधानविकल्पानां वृत्तिरस्ति स्वलक्षणे ।
सर्वं वाग्गोचरातीतमूर्तिर्येन स्वलक्षणम् ॥ ७३४

विशेषपरीक्षा ये पुनः कल्पिता एते विशेषा अन्त्यभाविनः ।
नित्यद्रव्यव्यपोहेन तेऽप्यसंभाविताः क्षणाः ॥ ८१३

समवायपरीक्षा यद्येकः समवायः स्यात् सर्वेष्वेव च वस्तुषु ।
कपालादिष्वपि ज्ञानं पटादीति प्रसज्यते ॥ ८३५
सम्बन्धिनो निवृत्तौ हि सम्बन्धोऽस्तीति दुर्घटम् ।
नहि संयुक्तनाशेऽपि संयोगो नोपतिष्ठते ॥ ८५७
यथा संयोगभावे तु संयुक्तानामवस्थितिः ।
समवायस्य सद्भावे तथा स्यात् समवायिनाम् ॥ ८५८

शब्दार्थपरीक्षा यस्य यस्य हि शब्दस्य यो यो विषय उच्यते ।
स स संविद्यते नैव, वस्तूनां सा हि धर्मता ॥ ८७०
तथा हि द्विविधोऽपोहः पर्युदासनिषेधतः ।
द्विविधः पर्युदासोऽपि बुद्ध्यात्मार्थात्मभेदतः ॥ १००४

तत्रायं प्रथमः शब्दैरपोहः प्रतिपाद्यते ।
बाह्यार्थाध्यवसायिन्या बुद्धेः शब्दात् समुद्भवात् ॥ १०११
तद्रूपप्रतिबिम्बस्य धियः शब्दाच्च जन्मनि ।
वाच्यवाचकभावोऽयं जातो हेतुफलात्मकः ॥ १०१२
साक्षादाकार एतस्मिन्नेवं च प्रतिपादिते ।
प्रसज्यप्रतिषेधोऽपि सामर्थ्येन प्रतीयते ॥ १०१३
तासां हि बाह्यरूपत्वं कल्पितं तच्च वास्तवम् ।
भेदाभेदौ च तत्त्वेन वस्तुन्येव व्यवस्थितौ ॥ १०४७
नैकात्मतां प्रपद्यन्ते न भिद्यन्ते च खण्डशः ।
स्वलक्षणात्मका अर्था विकल्पः प्लवते त्वसौ ॥ १०४९

अवेद्यबाह्यतत्त्वाऽपि प्रकृष्टोपप्लवादियम् ।
स्वोल्लेखं बाह्यरूपेण शब्दधीरध्यवस्यति ॥ १०६६
एतावत् क्रियते शब्दैर्नार्थं शब्दाः स्पृशन्त्यपि ।
नापोहेन विशिष्टश्च कश्चिदर्थोऽभिधीयते ॥ १०६७
वस्त्वित्यध्यवसायत्वान् नावस्तुत्वमपोह्ययोः ।
प्रसिद्धं सांवृते मार्गे तात्त्विके त्विष्टसाधनम् ॥ १०८९

प्रत्यक्षलक्षणपरीक्षा प्रत्यक्षं कल्पनापोढमभ्रान्तमभिलापिनी ।
प्रतीतिः कल्पना, क्लृप्तिहेतुत्वाद्यात्मिका न तु ॥ १२१४
जात्यादियोजनायोग्यामप्यन्ये कल्पनां विदुः ।
सा जात्यादेरपास्तत्वाददृष्टेश्च न संगता ॥ १२१६
तस्मात् स्वलक्षणे ज्ञानं यत् किंचित् संप्रवर्तते ।
वाक्पथातीतविषयं सर्वं तन्निर्विकल्पकम् ॥ १२८५
केशोण्डुकादिविज्ञाननिवृत्त्यर्थमिदं कृतम् ।
अभ्रान्तग्रहणं बाढं भ्रान्तत्वान् नेष्यते प्रमा ॥ १३१२

अनुमानलक्षणपरीक्षा स्वपरार्थविभागेन त्वनुमानं द्विधेष्यते ।
स्वार्थं त्रिरूपतो लिङ्गादनुमेयार्थदर्शनम् ॥ १३६२
त्रिरूपलिङ्गवचनं परार्थं पुनरुच्यते । १३६३
आचार्यैरपि निर्दिष्टमीदृक् संक्षेपलक्षणम् ।

पक्षधर्मस्तदंशेन व्याप्तो हेतुरितीदृशम् ॥ १३६४
स प्रमाणमिति प्राहुरनुमानं तु केचन ।
विवक्षामर्पयन्तोऽपि वाग्भिराभिः कुदृष्टयः ॥ १४५६
प्रत्यक्षश्च परोक्षश्च द्विधैवार्थो व्यवस्थितः । १७०१

बहिरर्थपरीक्षा अनिर्भासं सनिर्भासमन्यनिर्भासमेव च ।
विजानाति न च ज्ञानं बाह्यमर्थं कथंचन ॥ १९९९
विज्ञानं जडरूपेभ्यो व्यावृत्तमुपजायते ।
इयमेवात्मसंवित्तिरस्य याऽजडरूपता ॥ २०००
तदस्य बोधरूपत्वाद् युक्तं तावत् स्ववेदनम् ।
परस्य त्वर्थरूपस्य तेन संवेदनं कथम् ॥ २००२
विज्ञानत्वं प्रकाशत्वं तच्च ग्राह्ये निवर्तितम् ।
अनिर्भासाद्ययोगेन व्याप्तिस्तेनास्य निश्चिता ॥ २०८२
शक्तावनन्तरे ज्ञाने ग्राह्यांशो विषयस्थितिः ।
तात्त्विकी नेष्यतेऽस्माभिस्तेन मानं समर्थ्यते ॥ २०८३
विज्ञप्तिमात्रतासिद्धिर्धीमद्भिर्विमलीकृता ।
अस्माभिस्तद् दिशायातं परमार्थविनिश्चये ॥ २०८४

श्रुतिपरीक्षा वेदो नरं निराशंसो ब्रूतेऽर्थं न सदा स्वतः ।
अन्धात्तयष्टितुल्यां तु पुंव्याख्यां समपेक्ष्यते ॥ २३७४
किं च वेदप्रमाणत्वे निर्बन्धो यदि वो ध्रुवम् ।
निर्दोषकर्तृकत्वादौ तदा यत्नो विधीयताम् ॥ २४००
प्रज्ञाकृपादियुक्तानां तथा हि सुविनिश्चिताः ।
पौरुषेय्योऽपि सद्वाचो यथार्थज्ञानहेतवः ॥ २४०२
तस्या वस्तुनिबद्धायाः को बाधां मंस्यते जडः ।
शब्दमात्रेण तुच्छेन तद्भाविन्याऽथवा धिया ॥ २४२९
मिथ्यानुरागसंजातवेदाभ्यासजडीकृतैः ।
मिथ्यात्वहेतुरज्ञात इति चित्रं न किंचन ॥ २७४६
अतीन्द्रियार्थदृक् तस्माद् विधूतान्तस्तमश्चयः ।
वेदार्थप्रविभागज्ञः कर्ता चाभ्युपगम्यताम् ॥ ३१२३

अतीन्द्रियदर्शिपुरुषपरीक्षा क च बुद्धादयो मर्त्याः क च देवोत्तमत्रयम् ।
येन तत्स्पर्द्धया तेऽपि सर्वज्ञा इति मोहदृक् ॥ ३२०६
यतस्तु मूर्खशूद्रेभ्यः कृतं तैरुपदेशनम् ।
ज्ञायते तेन दुष्टं तत् सांवृतं कूटकर्मवत् ॥ ३२२७
सर्वार्थविषयं ज्ञानं यस्य दृश्यः स ते कथम् ।
सर्वार्थविषयं ज्ञानं तवापि यदि नो भवेत् ॥ ३२७६
स्वयमेवाऽऽत्मनाऽऽत्मानमात्मज्योतिः स पश्यति ॥ ३२९०
अद्वितीयं शिवद्वारं कुदृष्टीनां भयङ्करम् ।
विनयेभ्यो हितायोक्तं नैरात्म्यं तेन तु स्फुटम् ॥ ३३२२
प्रभास्वरमिदं चित्तं तत्त्वदर्शनसात्मकम् ।
प्रकृत्यैव स्थितं यस्मान् मलास्त्वागन्तवो मताः ॥ ३४३५
तस्मात् स्वसंवेदनात्मत्वं चेतसोऽपि प्रकाशनात् ।
अनारोपितरूपा च स्वसंवित्तिरियं स्थिता ॥ ३४३७
अतो निर्मलनिष्कम्पगुणसन्दोहभूषणः ।
दोषवाताऽविकम्प्यात्मा सर्वज्ञो गम्यते जिनः ॥ ३४४०
यतोऽभ्युदयनिष्पत्तिर्यतो निःश्रेयसस्य च ।
स धर्म उच्यते तादृक् सर्वैरेव विचक्षणैः ॥ ३४८६
आत्मात्मीयदृगाकारसत्त्वदृष्टिः प्रवर्तते ।
अहं ममेति माने च क्लेशोऽशेषः प्रवर्तते ॥ ३४८६
तदत्यन्तविनिर्मुक्तेरपवर्गश्च कीर्त्यते ।
अद्वितीयशिवद्वारमतो नैरात्म्यदर्शनम् ॥ ३४९२
एतदेव हि तज्ज्ञानं यद्विशुद्धात्मदर्शनम् ।
आगन्तुकमलापेतचित्तमात्रत्ववेदनात् ॥ ३५३५
अवेद्यवेदकाकारा बुद्धिः पूर्वं प्रसाधिता ।
द्वयोपप्लवशून्या च सा सम्बुद्धैः प्रकाशिता ॥ ३५३६
प्रकृत्या भास्वरे चित्ते द्वयाकाराकलंकिते ।
द्वयाकाराविमूढात्मा कः कुर्यादन्यथा मतिम् ॥ ३५३८
इदं तत् परमं तत्त्वं तत्त्ववादी जगाद यत् ।
सर्वसम्पत्पदं चैव केशवादेरगोचरः ॥ ३५४०

तस्माज्जगद्धिताधानदीक्षिताः करुणात्मकाः ।
अनिबन्धनबन्धुत्वादाहुः सर्वेषु तत्पदम् ॥ ३५६९

नैवावाहविवाहादिसम्बन्धो वाञ्छितो हि तैः ।
उपकारस्तु कर्तव्यः, साधु गीतमिदं ततः ॥ ३५७३

"विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥" ३५७४

अतीतश्च महान् कालो योषितां चातिचापलम् ।
शतशः प्रतिषिद्धायां जातौ जातिमदश्च किम् ॥ ३५७५

वेदाधीतिजडाविप्रा न परीक्षाक्षमा इति ।
विप्रेभ्य एव वेदादेः कृतं तैरुपदेशनम् ॥ ३५८२

यैः पुनः स्वोक्तिषु स्पष्टं युक्तार्थत्वं विनिश्चितम् ।
तत्प्रत्यायनसामर्थ्यमात्मनश्च महात्मभिः ॥ ३५८६

कुतीर्थ्यमत्तमातङ्गमदग्लानिविधायिनम् ।
एवमस्ताखिलत्रासाः सिंहनादं नदन्ति ते ॥ ३५८७

"तापाच्छेदाच्च निकषात् सुवर्णमिव पण्डितैः ।
परीक्ष्य भिक्षवो ग्राह्यं मद्वचो न तु गौरवात् ॥" ३५८८

॥ श्रीः ॥

सौगत-सिद्धान्त-सार-संग्रह

विनयपिटक

महावग्ग (महावर्ग)

उन भगवान् अर्हत् सम्यक्सम्बुद्ध को नमस्कार !

१, १, १. उस समय बुद्ध भगवान् **उरुवेला** (बुद्ध गया) में विहार करते हुये **नेरञ्जरा** (फल्गु) नदी के तट पर बोधिवृक्ष के नीचे प्रथम बार अभिसम्बुद्ध हुये। तब भगवान् ने प्रतीत्यसमुत्पाद पर अनुलोम और प्रतिलोम रीति से विचार किया। अविद्या के होने पर संस्कार, संस्कार के होने पर विज्ञान, विज्ञान के होने पर नाम-रूप, नामरूप के होने पर षडायतन, षडायतन के होने पर स्पर्श, स्पर्श के होने पर वेदना, वेदना के होने पर तृष्णा, तृष्णा के होने पर उपादान, उपादान के होने पर भव, भव के होने पर जाति और जाति के होने पर जरामरण—शोक, रोना पीटना, व्याधि, आधि और व्याकुलता आदि—उत्पन्न होते हैं। इस प्रकार इस केवल दुःख-स्कन्ध का समुदय होता है।

१, १, २. अविद्याजन्य समस्त रागद्वेष के नष्ट होने पर संस्कार, संस्कार के नष्ट होने पर विज्ञान, विज्ञान के नष्ट होने पर नामरूप, नामरूप के नष्ट होने पर षडायतन, षडायतन के नष्ट होने पर स्पर्श, स्पर्श के नष्ट होने पर वेदना, वेदना के नष्ट होने पर तृष्णा, तृष्णा के नष्ट होने पर उपादान, उपादान के नष्ट होने पर भव, भव के नष्ट होने पर जाति और जाति के नष्ट होने पर जरामरण—शोक, रोना पीटना, व्याधि, आधि और व्याकुलता आदि—नष्ट होते हैं। इस प्रकार इस केवल दुःखस्कन्ध का निरोध होता है।

१, १, ५. मैंने (बुद्ध ने) इस धर्म का साक्षात्कार किया—यह धर्म गंभीर है, कठिनता से देखने और जानने योग्य है, शान्त है, अत्युत्तम है, तर्क से अगम्य है, निपुण (अतिसूक्ष्म) है और पण्डितों द्वारा ही साक्षात् किया जा सकता है। लोग तृष्णासक्ति में लिप्त हैं, उसी में लगे हैं, उसी में प्रसन्न हैं। इन तृष्णासक्त, तृष्णारत और तृष्णाप्रमुदित लोगों के लिये कार्य-कारण-शृङ्खला-रूप प्रतीत्य

समुत्पाद को समझना अत्यन्त कठिन है। इन लोगों के लिये निर्वाण पाना भी अत्यन्त कठिन है—वह निर्वाण जहाँ समस्त संस्कारों का उपशम, सम्पूर्ण उपाधियों का त्याग, सारी तृष्णा का क्षय और इहामुत्र वैराग्य होता है।

उन लोगों के लिये अमृत के द्वार खुले हैं जो मेरे उपदेशों को सुन कर उनमें श्रद्धा करते हैं। (उन लोगों के लिये अमृत के द्वार बन्द हैं जो सद्धर्म को कानों से सुन कर भी उसमें श्रद्धा नहीं करते।)

१, १, ७. इसके बाद भगवान् ने सर्वप्रथम वाराणसी (बनारस) के ऋषिपत्तन मृगदाव (सारनाथ) में पाँच भिक्षुओं के समुदाय को यह उपदेश दिया—भिक्षुओ! मैं अर्हत् हूँ, तथागत हूँ, सम्यक् सम्बुद्ध हूँ। तुम मेरे उपदेश को कान लगा कर सुनो। अमृत प्राप्त हो चुका है। मैं अनुशासन करता हूँ। मैं धर्म का उपदेश देता हूँ। भिक्षुओं! प्रव्रज्या लेने वाले को दो अन्तों का सेवन नहीं करना चाहिये। कौन से दो? एक तो कामसुखों में आसक्ति जो हीन है, ग्राम्य है, पृथग्जनोचित है, अनार्य है और अनर्थों की जड़ है और दूसरी आत्मक्लेशों में आसक्ति जो दुःखमय है, अनार्य है और अनर्थों की जड़ है। भिक्षुओं! इन दोनों अन्तों को छोड़ कर तथागत ने मध्यम मार्ग का साक्षात्कार किया है।

भिक्षुओ! दुःख (प्रथम) आर्यसत्य है। जाति (जन्म) दुःख है, जरा दुःख है, व्याधि भी दुःख है, मृत्यु भी दुःख है, अप्रियसंयोग भी दुःख है, प्रियवियोग भी दुःख है, इच्छा पूर्ण न होना भी दुःख है—संक्षेप में पाँचों उपादान-स्कन्ध दुःखरूप हैं। (रूप, वेदना, संज्ञा, संस्कार और विज्ञान—ये पाँच स्कन्ध हैं)

भिक्षुओ! दुःख-समुदय (द्वितीय) आर्यसत्य है। (द्वादशाङ्ग प्रतीत्यसमुत्पादचक्र का चलना ही दुःख-समुदय है और अविद्या इसकी जननी है) अविद्याजन्य तृष्णा, जो अविच्छिन्न गति से चलती है और जिसके कारण संसार में आनन्द, आसक्ति और प्रमोद होता है, तीन प्रकार की है—कामतृष्णा, भवतृष्णा और विभवतृष्णा (यह तृष्णा ही दुःखसमुदय है)

भिक्षुओ! दुःख-निरोध (तृतीय) आर्यसत्य है। (अविद्यानाश से द्वादशाङ्ग प्रतीत्यसमुत्पादचक्र का निरोध ही दुःख निरोध है) उसी तृष्णा का अशेष निरोध होना, उसका त्याग, उसका सर्वथा क्षय होने पर जो अनासक्ति रूप निर्विकल्पावस्था होती है वही मुक्ति है।

भिक्षुओ ! दुःख-निरोध-मार्ग (चतुर्थ) आर्यसत्य है। यही आर्य अष्टांगिक मार्ग है—(१) सम्यक् दृष्टि, (२) सम्यक् संकल्प, (३) सम्यक् वाक्, (४) सम्यक् कर्मान्त, (५) सम्यक् आजीव, (६) सम्यक् व्यायाम, (७) सम्यक् स्मृति और (८) सम्यक् समाधि। यह मध्यमा प्रतिपत् तथागत ने साक्षात् की है।

भिक्षुओ ! जब मुझे इन चार आर्यसत्यों का तेहरा करके द्वादशाङ्ग यथार्थ-ज्ञान स्पष्ट हो गया तब मैंने कहा कि मैंने देव और मार तथा ब्रह्मा सहित लोक में और श्रमण-ब्राह्मण एवं देव-मनुष्य वाली प्रजा में अद्वितीय सर्वोत्तम सम्यक् सम्बोधि को पा लिया।

१, १, ८. इस प्रकार भगवान् बुद्ध ने वाराणसी के ऋषिपत्तन मृगदाव में सर्वप्रथम यह अद्वितीय धर्मचक्र चलाया, जिस धर्मचक्र को पहले कभी किसी श्रमण ने या ब्राह्मण ने या देवता ने या मार ने या ब्रह्मा ने या किसी और ने इस लोक में नहीं चलाया था।

१, २, ५. भिक्षुओ ! तुम, बहुत लोगों के हित के लिये, सुख के लिये, लोकानुकम्पा के लिये, देव-मनुष्यों के अर्थ, हित और सुख के लिये भिक्षु-चर्या करो। भिक्षुओं ! तुम इस आदि-कल्याण, मध्य-कल्याण, अन्त-कल्याण, सार्थक, सुन्दर शब्दों से युक्त, केवल, परिपूर्ण, परिशुद्ध ब्रह्म-चर्या का प्रकाश फैलाओ।

१, ४, २. जो धर्म हेतुप्रभव (हेतु-प्रत्यय-समुत्पन्न) हैं उनके हेतु को तथागत ने बताया है और उस महाश्रमण ने उनके निरोध को भी बताया है। इसे जान लेने पर यह विरज, विमल धर्मचक्षु उत्पन्न होती है कि जिन-जिन धर्मों का उदय है उनका निरोध भी है।

सुत्तपिटक (सूत्रपिटक)

दीघनिकायो (दीर्घनिकाय)

१. भिक्षुओ ! कुछ श्रमण और ब्राह्मण शाश्वतवाद को मानते हैं और वे आत्मा तथा लोक को शाश्वत बतलाते हैं। कुछ श्रमण और ब्राह्मण उच्छेदवाद को मानते हैं और वे सत्व का उच्छेद तथा विनाश बतलाते हैं। कितने ही श्रमण और ब्राह्मण ऐसे हैं जो अंशतः शाश्वतवाद और अंशतः उच्छेदवाद मानते हैं और वे आत्मा तथा लोक को अंशतः नित्य और अंशतः अनित्य बतलाते हैं। ...

भिक्षुओ ! ये श्रमण और ब्राह्मण या तो पूर्वान्तकल्पिक है या अपरान्तकल्पिक और या पूर्वान्तापरान्तकल्पिक। ये लोग बासठ कारणों से इन मतों को मानते हैं और इनके आधार पर अनेक प्रकार के व्यावहारिक शब्दों का प्रयोग करते हैं। इनके अतिरिक्त अन्य कारण नहीं मानते।

भिक्षुओ ! तथागत इन सब कारणों को जानते हैं और इनसे भी अधिक जानते हैं; किन्तु तथागत, सब कुछ जानते हुये भी, जानने का अभिमान नहीं करते। इन बुद्धि-कोटियों में न फँसने के कारण तथागत निर्वाण का साक्षात् करते हैं। वेदनाओं की उत्पत्ति, विनाश, अस्वाद, दोष और निवृत्ति को यथार्थतया जान कर तथागत इनमें अनासक्त हैं और इसीलिये विमुक्त हैं।

भिक्षुओ ! ये धर्म गम्भीर, दुर्ज्ञेय, दुरनुबोध, शान्त, अत्युत्तम, तर्क से अगम्य, निपुण और पण्डितों के जानने योग्य हैं, जिन्हें तथागत स्वयं जान कर तथा साक्षात् कर बतलाते हैं। जो तथागत के यथार्थ वर्णों को ठीक-ठीक जानते हैं वे ऐसा कहते हैं। (ब्रह्मजाल सूत्र)

(मगधराज अजातशत्रु भगवान् बुद्ध से कहते हैं—)

२. भन्ते ! एक बार पूरण कस्सप (पूर्ण काश्यप) से श्रामण्यफल (भिक्षु होने का फल) के बारे में पूछने पर उन्होंने अपने अक्रियवाद का प्रतिपादन किया—यदि कोई तेज छुरों वाले चक्र द्वारा इस सारी पृथ्वी के प्राणियों को एक माँस का खलियान बना दे, एक माँस का पुञ्ज बना दे, तो भी उसे कोई पाप नहीं लगेगा। इसी प्रकार दान से, दम से, संयम से या सत्य बोलने से कोई पुण्य नहीं होगा।

भन्ते ! एक बार मक्खलि गोसाल से श्रामण्यफल के बारे में पूछने पर उन्होंने अपने अहेतुवाद का प्रतिपादन करते हुये संसार की शुद्धि का उपाय बताया—सत्वों के क्लेश का कोई हेतु नहीं है, कोई प्रत्यय नहीं है और न सत्वों की विशुद्धि का ही कोई हेतु या प्रत्यय है।

भन्ते ! एक बार अजित केसकम्बली (अजित केशकम्बली) से श्रामण्यफल के बारे में पूछने पर उन्होंने अपने उच्छेदवाद या जड़वाद का प्रतिपादन किया—न दान है, न यज्ञ-याग है, न सुकृत है, न दुष्कृत है, न कर्मफल का विपाक है, न यह लोक है, न परलोक है। चार महाभूतों से बना हुआ यह मनुष्य जब मर

जाता है तो पृथ्वी महापृथ्वी में, जल महाजल में, तेज महातेज में और वायु महावायु में मिल जाते हैं और इन्द्रियाँ आकाश में लीन हो जाती हैं।

भन्ते! एक बार पकुध कच्चायन (प्रकुद्ध कात्यायन) से श्रामण्यफल के बारे में पूछने पर उन्होंने पूछा क्या और उत्तर क्या देते हुये अपने अकृततावाद का प्रतिपादन किया—पृथ्वी, जल, तेज, वायु, सुख, दुःख और जीव—ये सात काय अकृत, अनिर्मित, कूटस्थ हैं। ये चल नहीं होते, ये विकृत नहीं होते और न ये एक दूसरे को हानि पहुँचाते हैं। न कोई मारने वाला है, न कोई मृत्यु कराने वाला है, न कोई सुनने वाला है, न कोई सुनाने वाला है, न कोई जानने वाला है, न कोई ज्ञान कराने वाला है।

भन्ते! एक बार निगण्ठ नातपुत्त (निर्ग्रन्थ ज्ञातृपुत्र = महावीर वर्धमान) से श्रामण्यफल के बारे में पूछने पर उन्होंने अपने चातुर्याम संवरवाद का प्रतिपादन किया—निर्ग्रन्थ जल के उन सब व्यवहारों का वारण करता है जिनमें जल-कीटाणुओं के मरने का भय हो (अहिंसा); निर्ग्रन्थ सब गुणों से (सत्य आदि से) युक्त होता है; निर्ग्रन्थ सब पापों से रहित होता है तथा निर्ग्रन्थ सब पापों के वारण करने में रहता है। इस प्रकार निर्ग्रन्थ चार संवरों से संवृत रहता है।

भन्ते! एक बार संजय वेलट्ठिपुत्त से श्रामण्यफल के बारे में पूछने पर उन्होंने अनिश्चिततावाद का प्रतिपादन किया—मैं ऐसा भी नहीं कहता, मैं वैसा भी नहीं कहता; मैं 'नहीं' भी नहीं कहता, मैं 'नहीं' नहीं है' यह भी नहीं कहता; मैं 'है' भी नहीं कहता मैं 'नहीं है' भी नहीं कहता; मैं 'है और नहीं है' यह भी नहीं कहता, मैं "है' भी नहीं है और 'नहीं' भी नहीं है' यह भी नहीं कहता।

भन्ते! अब मैं आपसे भी पूछता हूँ कि श्रामण्यफल क्या है?

भगवान् ने उत्तर दिया—महाराज! असली श्रामण्यफल तो यह है कि भिक्षु बुद्धि की समस्त दृष्टियों का अतिक्रमण करके शील, समाधि और प्रज्ञासम्पन्न होता है। वह (पाँचों नीवरणों को—काम, व्यापाद, स्त्यानमृद्ध, औद्धत्य और विचिकित्सा को नष्ट करके) सवितर्क, सविचार और विवेक से उत्पन्न प्रीतिसुख वाले प्रथम ध्यान को पाकर विहार करता है। फिर वह वितर्क और विचार के शान्त हो जाने से मनःप्रसाद के कारण चित्तैकाग्रता से युक्त समाधि से उत्पन्न प्रीतिसुख वाले द्वितीय ध्यान को पाकर विहार करता है। फिर वह प्रीति और विराग की भी उपेक्षा

करके स्मृतिमान् होकर सुखविहार वाले तृतीय ध्यान को प्राप्त होकर विहार करता है। और फिर वह सुख और दुःख दोनों को छोड़ कर, पहले ही सौमनस्य तथा दौर्मनस्य के अस्त हो जाने से, दुःख-सुख रहित तथा स्मृति और उपेक्षा से शुद्ध चतुर्थ ध्यान को प्राप्त होकर विहार करता है। वह दुःख, समुदय, निरोध और मार्ग को यथार्थ जानता है। इस ज्ञान से वह कामतृष्णा, भवतृष्णा और अविद्या-तृष्णा से विमुक्त हो जाता है। उसके लिये जन्म-मरण-चक्र क्षीण हो जाता है। वह ब्रह्म-ज्ञान पा लेता है। उसके लिये कोई कर्तव्य शेष नहीं रहता। फिर वह यहाँ लौट कर नहीं आता। (श्रामण्यफलसूत्र)

९. हे पोट्ठपाद ! 'लोक शाश्वत है', 'लोक अशाश्वत है', 'लोक शाश्वताशाश्वत है', 'लोक न शाश्वत है न अशाश्वत', 'लोक सान्त है', 'लोक अनन्त है', 'लोक सान्त और अनन्त दोनों है, 'लोक न सान्त है न अनन्त है', 'तथागत मरने के बाद भी रहते हैं', 'तथागत मरने के बाद नहीं रहते', 'तथागत मरने के बाद रहते भी हैं और नहीं भी रहते', 'तथागत मरने के बाद न तो रहते हैं और न नहीं रहते', 'जीव और शरीर एक ही हैं', 'जीव और शरीर भिन्न हैं'—इन चौदह प्रश्नों को, जिनमें प्रत्येक प्रश्न 'यही सत्य है और अन्य सब मिथ्या' इस दृष्टि से देखा जाता है, मैंने अव्याकृत (अनिर्वचनीय) बतलाया है। ये प्रश्न न तो अर्थयुक्त हैं, न धर्मयुक्त, न आदि-ब्रह्मचर्य के लिये उपयुक्त; ये न निर्वेद के लिये हैं, न विराग के लिये, न दुःख निरोध के लिये, न शान्ति के लिये, न अभिज्ञा के लिये, न परमार्थ संबोधि के लिये और न निर्वाण के लिये। इसीलिये मैंने इन्हें अव्याकृत कहा है। 'यह दुःख है', 'यह दुःख-समुदय है', 'यह दुःखनिरोध है' और 'यह दुःखनिरोध मार्ग है'—इन चार आर्यसत्यों को मैंने व्याकृत किया है। ये सार्थक हैं, धर्म के लिये उपयोगी हैं, आदि ब्रह्मचर्य के लिये उपयुक्त हैं; ये निर्वेद के लिये हैं, विराग के लिये हैं, निरोध के लिये हैं, उपशम के लिये हैं, अभिज्ञा के लिये हैं, परमार्थ-संबोधि के लिये हैं और निर्वाण के लिये हैं। इसीलिये मैंने इन्हें व्याकृत किया है।

हे पोट्ठपाद ! यदि कोई पुरुष यह कहे—'इस देश में जो सर्वाधिक सुन्दरी है, मैं उसको चाहता हूँ, उसकी कामना करता हूँ।' यदि लोग उससे पूछें—हे पुरुष जिस सर्वाधिक सुन्दरी को तू चाहता है, जिस की तू कामना करता है, क्या तू जानता है कि वह क्षत्रिया है, ब्राह्मणी है, वैश्य-स्त्री है या शूद्री है ?

क्या तू उस का नाम और गोत्र जानता है ? क्या तू जानता है कि वह लम्बी है या छोटी है या मंझले कद की है; काली है या श्यामा है या मद्गुर-वर्ण है; किस गाँव में या कस्बे में या नगर में रहती है ? ऐसा पूछने पर वह पुरुष उत्तर दे कि वह यह कुछ नहीं जानता। तो क्या उस पुरुष का भाषण अप्रामाणिक नहीं हो जाता ? इसी प्रकार हे पोट्ठपाद ! जो श्रमण या ब्राह्मण यह कहते हैं, यह दृष्टि रखते हैं कि मरने के बाद आत्मा कष्टरहित और अत्यन्त सुखी होता है, उनसे मैं पूछता हूँ—आयुष्मान् ! क्या सचमुच आप लोग यह कहते हैं, यह दृष्टि रखते हैं कि मरने के बाद आत्मा कष्टरहित और अत्यन्त सुखी होता है ? मेरे ऐसा पूछने पर वे उत्तर देते हैं—'हाँ'। मैं फिर उनसे यह पूछता हूँ—आयुष्मान् ! क्या सचमुच आप लोग उस एकान्त सुख वाले लोक को जानते हो, देखते हो, वहाँ विहार करते हो ? ऐसा पूछने पर वे कहते हैं—'नहीं तो'। मैं फिर उनसे यह पूछता हूँ—आयुष्मान् ! क्या आप सब लोग एक रात या एक दिन उस एकान्त सुखी आत्मा को जानते हो ? ऐसा पूछने पर वे कहते हैं—'नहीं'। तो क्या तुम मानते हो पोट्ठपाद ! कि ऐसा होनेपर उन श्रमणों या ब्राह्मणों का भाषण अप्रामाणिक नहीं हो जाता ?

भिक्षुओ ! जो प्रतीत्यसमुत्पाद को जानता है, वही धर्म को जानता है; जो धर्म को जानता है, वही प्रतीत्यसमुत्पाद को जानता है। जैसे गाय से दूध, दूध से दही, दही से मक्खन, मक्खन से घी और घी से माँडा होता है; जिस समय दूध होता है, उस समय न दही होता है, न मक्खन, न घी, न माँडा; दूध ही उस समय उसका नाम होता है। जिस समय दही होता है, दही ही उस समय उसका नाम होता है। इसी प्रकार हे भिक्षुओ ! अतीत जन्म के समय वही सत्य होता है, प्रत्युत्पन्न और अनागत मिथ्या होते हैं; अनागत के समय वही सत्य होता है, अतीत और प्रत्युत्पन्न मिथ्या होते हैं; प्रत्युत्पन्न के समय वही सत्य होता है, अतीत और अनागत मिथ्या होते हैं।

भिक्षुओ ! ये सब लौकिक संज्ञायें हैं, लौकिक निरुक्तियाँ हैं, लौकिक व्यवहार हैं, लौकिक प्रज्ञप्तियाँ हैं। तथागत इनका व्यवहार करते हैं, किन्तु बिना इनमें लिप्त हुये। (पोट्ठपाद सूत्र)

१५. हे आनन्द ! आत्मा को जतलाने वाले लोग इस प्रकार उस को जताते

हैं—रूप आत्मा है, वेदना आत्मा है, संज्ञा आत्मा है, संस्कार आत्मा है, विज्ञान आत्मा है। किन्तु आनन्द! ये सब धर्म अनित्य हैं, संस्कृत हैं, प्रतीत्यसमुत्पन्न हैं, क्षयधर्म हैं, व्ययधर्म हैं, विरागधर्म हैं, निरोधधर्म हैं। जब सभी धर्म अनित्य, सुखदुःखमय, उत्पत्ति-विनाशयुक्त हैं, जब सभी धर्मों का पूर्ण निरोध होता है, तो यह कैसे कहा जा सकता है कि 'यह मैं हूँ', 'यह मेरा आत्मा रूप है या वेदना है या संज्ञा है या संस्कार है या विज्ञान है'। (महानिदान सूत्र)

१६. भिक्षुओ! जब तक भिक्षु बार-बार मिल-जुल कर बैठक करने वाले रहेंगे; जब तक वे सब एक होकर साथ साथ बैठेंगे और साथ-साथ उठेंगे तथा एक होकर संघ के कर्तव्यों को करेंगे; जब तक वे अविहित का प्रज्ञापन नहीं करेंगे और विहित का उच्छेद नहीं करेंगे और विहित भिक्षु-नियमों के अनुसार चलेंगे; जब तक वे संघ के पिता, संघ के नायक, स्थविर भिक्षुओं का सत्कार करेंगे, गौरव करेंगे, मानेंगे, पूजेंगे और उनकी बातों को सुनने योग्य समझेंगे; जब तक वे पुनः पुनः उत्पन्न होनेवाली तृष्णा के वश में नहीं पड़ेंगे; जब तक वे वन की कुटियों में सोने की इच्छा रक्खेंगे; जब तक प्रत्येक भिक्षु यह स्मरण रक्खेगा कि भविष्य में योग्य सब्रह्मचारी आवें और आये हुये योग्य सब्रह्मचारी सुख से विहार करें, तब तक भिक्षुओं की निश्चय ही वृद्धि समझना, हानि नहीं। भिक्षुओ! जब तक ये सात अपरिहाणीय धर्म भिक्षुओं में रहेंगे, तब तक भिक्षुओं की निश्चय ही वृद्धि समझना, हानि नहीं।

अन्तिम समय आने पर भगवान् ने भिक्षुओं को आमन्त्रित किया—भिक्षुओ! यदि बुद्ध, धर्म या संघ, मार्ग या प्रतिपत् के विषय में किसी भी भिक्षु को कोई भी शंका या विमति हो, तो पूछ लो, फिर पीछे पश्चात्ताप मत करना। ऐसा कहने पर वे सब भिक्षु चुप रहे। एक भी भिक्षु ऐसा नहीं था जिसे शंका या विमति होती। तब भगवान् ने भिक्षुओं को आमन्त्रित किया—भिक्षुओ! आत्मदीप बनकर विहरो, आत्मा की ही शरण लो, अन्य की नहीं; धर्म ही तुम्हारा दीपक है, धर्म ही तुम्हारा शरण-स्थल है, अन्य की शरण मत लो। हन्त! भिक्षुओ! अब तुम्हें कहता हूँ—सब संस्कृत धर्म नाशमान हैं; अप्रमाद के साथ जीवन के लक्ष्य को सम्पादन करो—यह तथागत का अन्तिम वचन है।

(महापरिनिर्वाण सूत्र)

मज्झिमनिकायो (मध्यमनिकाय)

२८. भिक्षुओ ! रूप-उपादान-स्कन्ध किसे कहते हैं ? चारों महाभूतों को, पृथ्वीधातु, जलधातु, अग्निधातु और वायुधातु को, तथा इन चारों महाभूतों से उत्पन्न रूप को रूप-उपादान-स्कन्ध कहते हैं।

